स्फाटिकीमाला

--पण्डितविष्णुकान्तशुक्लः

सुधा-कमल ग्रन्थालय मुजफ्फरनगर

स्फाटिकीमाला

(मुक्तककाव्यम्)



रचयिता

पण्डितविष्णुकान्तशुक्लः

साहित्याचार्यः, एम०ए (हिन्दी-संस्कृतयोः), साहित्यरत्नम्

हिन्दी-विभागाध्यक्षः

जे० वी० जैन कालेजः, सहारनपुरम् (उ० प्र०)

सुधा-कमल-ग्रन्थालयः

मुजफ्फरनगरम् (उ० प्र०)

स्फाटिकीमाला

(मुक्तककाव्यम्)

रचयिता : पण्डितविष्णुकान्तशुक्लः

© : पण्डितविष्णुकान्तशुक्लः

प्रकाशकः : सुधा-कमल-ग्रन्थालयः,
२६४, उत्तरी गांधी कालोनी,
मुज़फ्फ़रनगरम् (उ०प्र०)

मुद्रकः : देव प्रिण्टर्स,
२६५, उत्तरी गांधी कालोनी,
मुज़फ्फ़रनगरम् (उ० प्र०)

संस्करणम् : प्रथमम्, १९८० ई०

मूल्यम् : रु० १५ : ००

समर्पणम्

मातृ-चरणेषु

अयि ममतामयि मात-
स्तव महिमा केन शक्यते ज्ञातुम् ?
जठरे स्वांके स्वान्ते
पुत्रं रक्षस्यनुपलं त्वम् ॥

विषय-सूची

१.	द्वित्राः शब्दाः	विष्णुकान्त शुक्लः	
२.	शुभाशंसन	सीताराम चतुर्वेदी	
३.	भूमिका	डॉ० रमेशचन्द्र शुक्लः	i–xi
४.	स्फाटिकामाला		१—

द्वित्राः शब्दाः

अथैनां प्रकृतिस्वरूपां समस्तजीवसमुपाश्रितां, विविधगुणगण-गरिष्ठां नारीशक्ति प्रबलां बलामिव पोषणैकस्वभावां स्वेच्छयैव जगत्स्थितिकारिणीं चितिमिव चैतन्यमयीं संसारानलदह्यमान-जीवानां रसमयीं सरसीमबलेति न जाने किमिति कथयति गतानुगतिको लोकः ?

किमासामबलात्वम् ? किमेताः सेनासु न सन्ति ? अध्यापन-कार्येषु किन्नैताः शोभन्ते ? आकाशवाणी-दूरदर्शन-दूरभाषकेन्द्रेषु न लभन्ते किमु एताः सम्मानम् ? चलचित्रेषु, संगीतेषु नास्ति किमु आसां महन्महत्त्वम् ? वायुयान परिचारिकानां, चिकित्सालयेषु सेवासंलग्नानां एतासां किन्नास्ति अद्वितीयं स्थानम् ? अद्य इमाः पर्वतारोहणेषु, नैकासु क्रीडाप्रतियोगितासु, सर्वविषयाध्ययनेषु गच्छन्ति अग्रे । युवानस्तु वराकाः सर्वविधउपद्रवाभावे कथमपि पठितुं प्रवर्तन्ते । न केवलं भारते अपितु विश्वस्मिन् विश्वे सर्वक्षेत्रेषु नारीणां बालानाञ्च स्थानमन्यदेव । केवलं मोहमद प्रियाणां कृते एता अद्यापि हेयदृशावलोकनीयाः सन्ति । 'अबले'यमिति, मत्वाऽऽसा-मुपरि अत्याचारं कुर्वन्तः किन्न सन्ति अबलाः ? मया एतदेव विचार्य यदा कदा स्वविचारा आर्यासु निबद्धाः ।

अस्याः स्फाटिकीमालायाः भूमिकां विलिख्य आचार्यपादैः काव्यतत्त्वविद्भिः साहित्य-सांख्ययोगाचार्यैः डॉ० श्रीमद् रमेश-चन्द्र शुक्ल महाभागैः नितरामुपकृतोऽस्मि । नूनमिमां भूमिकां विलोक्यैवातिसूक्ष्ममतयोऽपि कवयो नास्यां दोषविमर्शं करि-ष्यन्ति । श्रीमदाचार्यं सीतारामचतुर्वेदिमहाभागैः कृतविद्या-तीर्थावगाहनैः अभिनवभरतैः शुभाशंसैराशंसितोऽस्मि । ममा-ग्रजैः बरेलीकालेजे संस्कृतविभागाध्यक्षैः दक्षतर श्रीमत् कृष्ण-कान्तशुक्लैः इयं कृतिः हिन्द्यां अनूदिता । एभिः सर्वैरेव अहं

यथानुरूपं संवर्द्धितः ? शिरोनमनमन्तरा किं कर्तुं प्रभवति अयं किङ्करो विदुषाम् ? रेखाङ्कनं दक्षतर दिनेशचन्द्र अग्रवालेन अस्मत्कालेजे कलारंजनाध्यापकेन कृतमिति तत्कृते धन्यवादाः ।

मम भागिनेयेन सुश्रीकेन कमलेशकुमार कपिलेन, सुधा-कमल ग्रन्थालय मुजफ्फरनगराध्यक्षेण इयं स्फाटिकीमाला सर्व-जनसुलभाकृता मुद्रयित्वा, इति अस्मै शुभाशिषः । अन्येभ्यः सर्वेभ्य एव प्रत्यक्षाप्रत्यक्षरूपेण साहाय्यसम्पादकेभ्यः साधुवादाः । स्फाटिकीमाला ग्रथने मम सहधर्मिण्या श्रीमत्यादिनेशनन्दिन्या सर्वतो-भावेन साहाय्यमाचरितमिति तस्यै किं कथनीयम् ?

नाहं कविः, न वा काव्यमर्मज्ञः। नात्र काव्यरसः नाप्यलङ्काराः, नहिच्छन्दोवैचित्र्यम्, नापि गुणगरिमा, नैव रीतिरमा, नो शब्दार्थौ काव्यानुरूपौ । अस्यां स्फाटिकीमालायां क्वचिन्मुद्रणे अक्षराणा-मदर्शनं, क्वचिदधिकपदत्वं, क्वचिन्मात्रालोपः, क्वचिद्वर्णव्यतिक्रमः, क्वचिदनुस्वारानुनासिकयोरत्यन्ताभावःइति सर्वं दृक्पथे समा-गमिष्यति । सुधीभिः क्षन्तव्यमस्ति सर्वमपि दोषजातम् । पञ्च-विंशति संख्यक-आर्यायाः प्रथमश्चरणः इत्थं पठनीयः—

'पुनरपि येयं द्वन्द्वे'

प्राकृतजन वाचमिव अबोधशिशुशब्दजालमिव श्रुत्वा गुण-वृद्धाः प्रसन्ना एव भविष्यन्ति, इतरे तु दत्तकपटाञ्जननयना नैतां कृतिमवलोकयिष्यन्ति । केवलमिदमेव जानामि—

"गुणदोषौ बुधो गृह्णन्निन्दुक्ष्वेडाविवेश्वरः ।
शिरसा श्लाघते पूर्वं परं कण्ठे नियच्छति ।।"

विजयादशमी
११-१०-१९७८

[signature]

शुभाशंसन

पण्डितप्रवर श्री विष्णुकान्त शुक्ल की स्फाटिकीमाला का आद्यन्त अनुशीलन करने का सुखद अवसर प्राप्त हुआ। शुक्लजी ने काव्य-रचना की गतानुगतिक पद्धति से भिन्न पूर्णत: अभिनव दृष्टि से अबला-संज्ञक सबला महिला वर्ग के सभी पक्षों के महत्त्व का विश्लेषण, अन्वेषण और आशंसन किया है।

प्राचीन काव्यों और नाटकों में कोमल भावों की अभिव्यञ्जना के लिए आर्या छन्दका व्यापक प्रयोग हुआ है सम्भवत: शुक्ल जी ने अपने इस अभिनव-मुक्तक काव्य में इसीलिये आर्या छन्द का ही मधुर आश्रय लिया है। दूसरा कारण यह भी हो सकता है कि अबला और कामिनी को आर्या सिद्ध करने के लिए आर्या छन्द ही अधिक उपयुक्त प्रतीत हुआ होगा। कुछ भी हो, आर्या छन्द में आर्या नारीका यह परिचय निश्चय ही अत्यन्त प्रशंसनीय आर्य कविकर्म है।

महाकवि बाणभट्ट ने अपने प्रसिद्ध गद्यकाव्य ग्रन्थ "कादम्बरी" में एक स्थान पर कहा है–

"अपगतमले हि मनसि स्फटिकमणाविव रजनिकर-गभस्तय: सुखं प्रविशन्त्युपदेशगुणा: ।।"

इसी को तनिक सा परिवर्तन करके सगौरव कहा जा सकता है-"अपगतमले हि मनसि स्फाटिकमालिकायामिव रजनिकर गभस्तय: सुखं प्रविशन्त्य-

बलागुणाः" ।

इस लघु मुक्तक काव्य में शुक्ल जी ने नारी के शारीरिक वैभव, पारिवारिक गुरुत्व, सामाजिक महत्त्व सभी पक्षों का सूक्ष्म निरीक्षण करके नारी के ललित पक्ष के अतिरिक्त उसके सार्वजनिक स्वरूप को अधिक विशद् रूप से प्रदर्शित करने का अत्यन्त सफल प्रयत्न किया है ।

यद्यपि हमारे देश के मनीषियों ने नारी की महत्ता मानते हुए यहाँ तक कहा है –

"यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः ।"

किन्तु व्यवहार में प्रायः पुरुष वर्ग सभी युगों में महिला वर्ग की उपेक्षा करता आया है और अपने को उनसे श्रेष्ठ मानता चला आया है । अपनी इस श्रेष्ठता-भावना के मद में वह नारी वर्ग के प्रति अत्याचार करने में भी संकोच नहीं करता रहा । वर्तमान युग में स्वतन्त्रता प्राप्त करने के पश्चात् अपने देश में अपने संविधान में पुरुष और स्त्री सभी को समान पद प्रदान किया है, तथापि समाज में आज भी स्त्रियों के प्रति असमानता और विषमता का व्यवहार प्रत्यक्ष दिखलाई देता है ।

ऐसी दशा में यह आर्या छन्दोबद्ध स्फाटिकीमाला निश्चय ही नारी के अपमानजनक अबला विशेषण को दूर करने और उसके समादृत आर्यास्वरूप को स्वीकार कराने में समर्थ होगा ।

मैं इस मुक्तक काव्यका हृदय से अभिनन्दन करता हूँ और विश्वास करता हूँ कि कवि की उर्वर प्रतिभा इसी प्रकार मुखर होती रहेगी ।

सीताराम चतुर्वेदी
६३/४३ उत्तर बेनिया बाग,
वाराणसी-२२१००१

गुरु-पूर्णिमा
सं० २०३५

॥ श्रीः ॥

भूमिका

वात्सल्यधाम्नि मृदुताकरुणावरेण्ये
यस्याः समस्तजगती परिवर्धतेऽङ्के ।
स्तन्यं निपीय परिपोषणमेति चैषा
नारी क्षमासुमधुरा परिणूयते सा ॥

श्रीकविप्रवरसाहित्याचार्य-एम. ए. प्रभृतिविविधविरुदावलिममलङ्कृत-प्रोफेसरविष्णुकान्तशुक्लविरचितां गीर्वाणवाणीसुगुम्फितां आर्यप्रियार्याछन्दोऽभिगीतां रसाभिरामैर्ललितार्थावदातैर्वल्गुताभिवन्दितैः पदैर्नितराञ्चेतोहरं-मौक्तिकैरिव संवलितां कामपि कमनीयामेव श्रियं पुष्णन्तीं लोकोत्तरं लावण्यं सृजन्तीं रमणीमिव भावबन्धुरतां विकिरन्तीं नारीजातेर्दिव्यं महिमानं गरिमाणञ्च हृदि हृदि निवेशयन्तीं, सुधीसंसृतिपरितोषणकारिणीं कवेः प्रतिभा-मुन्मीलयन्तीं स्फाटिकीमालाभिधानां सचेतसां चेतांसि परिप्रीणयितुमिमाम-भिनवां रचनां संस्कृतवाङ्मयजगतः प्राशस्त्याकलिते मञ्चेऽवतरन्तीं विलोक्य कस्य न विपश्चितः सहृदयस्य च चेतो भृशं प्रसन्नतां विन्दते ?

चिरादस्माभिः स्त्रीजातेर्गौरवं नानासद्गुणविभूषितत्वं नैसर्गिकं श्रेष्ठ-त्वञ्च विस्मर्यन्तेऽनस्तत्सर्वं स्मारयितुमथ च यास्माभिः प्रत्यहं तस्या अवमा-नना क्रियते या च तास्ववज्ञाताधीर्निधीयते ततोऽस्मान् वारयितुं स्वकीयया-नया परममञ्जुलया रचनया कविः प्रयत्नं कुर्वाणः पर्यवलोक्यते । स्त्रीषु क्रिय-माणोऽद्यतनो निरादरः कविं नितरां दुनोति ताः प्रति 'अबला' इत्येतत् कथनं न सः सोढुं शक्नुते । वस्तुतो वैदिकेऽनेहस्यथ च तदुत्तरकालेऽपि समाजे तासां महानादरो बभूव ; ताः परमसम्मानदृष्ट्या वीक्षिता अभूवन् । जायैव निकेतनम्

इत्येषोदाराभावना वेदयुगेऽतितरां प्रौढिमानं गता परिवीक्षिताभूत्। तामन्तरेण न धार्मिकाणि कृत्यानि सम्पन्नतां गन्तुमार्हन्नित्येतेन तासां सहधर्मिणीत्वं स्फुटतयाभिव्यक्तिमयते[1]। ऋषयो नारीणां गुणावलिमाह्लिकीं परिचर्याञ्च प्रशंसन्तो न तृप्यन्ति। कन्याः स्युः सुयोग्याः प्राप्तोच्चशिक्षाः इत्येतदर्थं कला-संगीत-नृत्याभिनयादिसम्बन्धिन्याः शिक्षायास्तदा सम्यग् व्यवस्था प्रबन्धश्चासीत्। स्त्रीणां मन्त्रद्रष्टृत्वेन स्पष्टतयैव विदितं जायते यत् तदानीं स्त्रीशिक्षानिमित्तेन समुचितानि शिक्षाश्रमपदानि शुशुभिरे। घोषा-लोपामुद्रा-अपाला-रोमशा-सूर्याप्रभृतिर्ऋषिविदुषीनां नारीणां ज्ञानप्रकाशेन विश्वस्य दिशाः सकलाः आलोकिता बभूवुः। तासां दार्शनिकत्वमाध्यात्मिकत्वं वा जगति भारतस्य शिरः समुन्नतं चक्रे। तासु कृत्स्नतया नैतिकता विरेजे। तासां सदाचरणं सर्वत्रैव सुविदितमासीत्। ताः श्रेष्ठाचारवत्यो मङ्गलकारिण्यः स्मिताननाः भवन्त्य एकाग्रचित्तेन स्वभर्तरि प्रेमचारुचरित्रा अवाप्यन्त[2]। ता गृहिणी-मातृ-सहचरीपदासीनाः सत्यः परिवारे समाजे च स्वकीयं सम्मानपूर्णमधिकारं निदधते स्म। पुरुष इव ताः अपि सर्वाधिकारवत्यः समलक्ष्यन्त। ताः शास्त्रार्थेषु, यज्ञेषु, अन्येषु च धार्मिकेषु सारस्वतेषु सामाजिकेषु च समारोहेषु भागं गृह्णन्त्यः समलभ्यन्त। पुरुष इव ताः अपि ऋणत्रयादुन्मुक्ता भवितुं निरदिश्यन्त। शारीरं मानसिकम् आध्यात्मिकञ्च बलं समीचीनतयाधिगम्य ताः परिवारे समाजे च-उभयोरपि क्षेत्रयोः जीवनमनैषुः। वेदाभ्यासं विधाय सम्यक् कन्याः अपि बाल्यं नयन्त्यः प्रैक्ष्यन्त। शिक्षार्जनं तासां कृतेऽनिवार्यं बभूव। युवावस्थातः प्राक् न ताः गार्हस्थ्याश्रमे प्रवेशं प्राप्तुमशकन्[3]। स्त्रियां प्रसन्नायामेव सत्यां कुलं नन्दति वर्धते च इत्येषा बलवतीधारणा तदावाप्यत। तासां सर्वविधतया सम्माननं संरक्ष-

---

१–तैत्तिरीय ब्रा० २।२।२।६.

२– अभिप्रवन्त समनेव योषाः कल्याण्यः स्मयमानासो अग्निम्।

(ऋग्वेदः, द्वि. खं., सू. ५८, पृ. ६५३, गायत्रीतपोभूमि प्रकाशनम्)

३– युवा सुवासाः परिवीत आगात्स उश्रेयान् भवती जायमानः।

(ऋग्वेदः, म.३, सू. ८, मं. ४)

णञ्च सर्वथैवोचितं मतमभूत्[1]। ताः परिवारे दक्षाः गृहकार्येषु, अमुक्ताहस्ताः व्यये, उपस्कृताः सुसंस्कृताश्च पर्यवालोक्यन्त[2]। एतेन तासां सम्मानपूर्णं जीवनं बभूवेति स्पष्टतया विदितं जायते। ताः (कन्याः) स्वाभिमतं भर्तारं प्राप्नुयुः अतः स्वयंवरप्रथा च प्रचलितासीत्[3]। विवाहः पवित्रशुभबन्धनं मतमभूत्। पत्नीमात्मानं पत्युर्दासीं पतिश्चात्मानं पत्न्याः दासममंस्त। न स्त्रियः भोग्यत्वेन मता अभूवन् परं ताः धर्मसाधनत्वेन मता अजायन्त। नातीतयुगे भौतिकं सुखं जीवनस्य पारमार्थिकं सुखमत्रागम्यत। अस्मदीयं पूज्यं भारतं भौतिकेभ्यः सुखेभ्यः परस्ताद् विराट्सत्ताया दर्शनार्थं सततं रतमवाप्यत। तद्विश्वस्य कणे कणे तत्सर्वव्यापकसत्तायाः मधुरं क्वणनं शृण्वत् प्रत्यलक्ष्यत। आध्यात्मिकं चारित्रिकञ्च सौन्दर्यमेव तस्य परमलक्ष्यमासीत्। तत्प्राप्त्यर्थं हि भारतीयः स्वकीयं जीवनमपि होतुं सन्नद्धोऽधिगम्यते स्म। तदानीन्तने काले त्याग-दया-क्षमा संयमादिसद्गुणानामेवाधिक्यं प्राबल्यञ्च दृष्टमभूत्। नैतिकता जीवनस्य रोम्णि रोम्णि व्यराजत। सा नैतिकता शोणिते वारिणि-लवणमिव लीना भवन्ती विलोकिताभवदतस्तस्या जीवनात् पृथक्करणं कठिन-मेव न, सम्भवमेव नासीत्। एतस्मादेव कारणात् तदा नार्यो न भोग्या इव

१,२– सन्तुष्टो भार्यया भर्ता भर्त्रा भार्या तथैव च।
यस्मिन्नेवकुले नित्यं कल्याणं तत्र वै ध्रुवम्॥
यदि हि स्त्री न रोचेत पुमांसं न प्रमोदयेत्।
अप्रमोदात् पुनः पुंसः प्रजनं न प्रवर्तते॥
स्त्रियां तु रोचमानायां सर्वं तद्रोचते कुलम्।
तस्यां त्वरोचमानायां सर्वमेव न रोचते॥ मनुः, ३ / ६०-२६)

पितृभि र्भ्रातृभिः............पूज्याः भूषयितव्याश्च.........ईप्सुभिः॥
यत्र नार्यस्तु............तत्राफलाः क्रियाः॥
शोचन्ति जामयः...............सत्कारेषूत्सवेषु च॥ (मनुः, ३/५५-५७,५६)
सदा प्रहृष्टया .... चामुक्तहस्तया॥ (मनुः, ५/१५०)

३– स्तोमं जुषेथां युवशेवकन्यनां विश्वेह देवौ सवनाव गच्छतम्।
(ऋग्वेद, मं. ८, सू. ३५, मं. ५)

सञ्जाताः, न पुरुषात् ता अवरा मताः सञ्जाताः ; न च ताः कदाप्यनाहृता अवज्ञाताश्चाभूवन् । सत्यम् अहिंसा च पुरातनेऽनेहसि सततमादरमलभेता-मित्येतस्माच्च कारणादिह नारीणां कृते सर्वेऽप्युन्नतिकारका अधिकाराः प्रदत्ता अभवन् । नार्याः शिक्षितत्वात् तज्जीवनस्याध्यात्मिकतार्चनकारित्वात् परिवारे सर्वतः आनन्द एवानन्दो दृष्टोऽभूत् । तस्याः परिवारः स्वपतिं स्वपुत्रं स्वपुत्रीं च यावदेव न सीमित आसीत् । ननान्दा, श्वश्रू, श्वशुरः, देवरो ज्येष्ठोऽन्ये च बान्धवाः सर्वेऽपि तस्याः परिवार एव सन्निविष्टा अभूवन् । सा परिवारस्य सर्वानपि सदस्यान् प्रति स्वकीयं कर्त्तव्यं पालयितुमनिशं जागरूकावाप्यत । न कोऽपि कदापि तां कर्त्तव्यच्युतां वा कर्त्तव्ये प्रमादमाचरन्तीमवाप्नोत् । प्रातःकालादेव सा स्वसेवाभारं सहर्षमवाक्षीत् । निशाया गम्भीरमन्धकारं यावत् सा स्वकर्तव्यं सम्यङ्मनोयोगपूर्वकं विदधती वीक्ष्यते स्म । सा स्वसदनस्य राज्ञ्यासीद्[1] दास्यपि । परं हन्त, सा स्वप्नेऽप्यात्मानं दासीं नामन्यत-इत्यत्र तदीया महत्ता तदीया श्रेष्ठता सन्निहिताभवत् । गृहे सर्वेऽपि तां गृहस्वामिनीं मन्यमानास्तत्र तथैव व्यवाहरन् यथा स्वामिनि तदितरजनानां व्यवहार आचारश्चापेक्ष्येते । वस्तुनो भारतीया नार्या जीवनं सदा दयामयं, ममतामयं, त्यागमयं, तपस्यामयं, पतिभक्तिमयमवालोक्यत । सा पतिपुत्रादिस्वजनादिहितायोपोषिणा प्रत्यलक्ष्यत । परिवारः सुखसमृद्धिमयः स्यादित्येतद्धेतोः सा भगवन्तं परमेश्वरं प्रार्थयन्ती प्रैक्ष्यत । समये सत्यागते सा स्वजीवनमप्यर्पयन्ती दृष्टाभवत् । न सा जीवनार्पणे कदाप्युद्विजते स्म । पत्यौ सा यां श्रद्धां यञ्च विश्वासं पर्यपुष्णात् सा श्रद्धा स विश्वासश्च कदापि तु यात्यन्धविश्वासम् । तस्मात्कारणात् यत् तयोन्मीलिताभ्यां लोचनाभ्यां प्रेक्षणीयमस्ति तत्रापि सा निमीलितनयना सञ्जायते स्म । न सा कदापि पत्युर्निन्दामसहत न चापमानमेव मार्ष्टि स्म । या भारतीय नारी ह्रीभारात् प्रणता भवन्ती कस्यापि पुरः शिरसः समुत्थापनेऽपि त्रस्यति सा पत्युरवमाननायाः समये चण्डिका सञ्जायते । वस्तुतो न भारतीया योषित् परिवीक्षिताभूदिन्द्रियलोलुपा । सा आत्मनः उपरि

१—ऋग्वेदः १०।८५।४६।

पूर्णं नियन्त्रणं निधाय स्वकर्त्तव्यानि सम्यग् जुगोप । नात्र सन्देहो यद् भारतीयाया नार्या जीवनं यज्ञाय अकल्पत । सा मृत्युं यावद् यज्ञमयं जीवनं धारयन्त्यजीवत् । सर्वथैव भारतीयाया नार्या जीवनं देशान्तरस्य नारीणां कृतेऽनुकरणीयं स्पृहणीयं जीवनमभवत् ।

पुरा नारीणां समाजे, गृहे च य आदरः समवालोक्यत न स आदरस्तासु दृश्यते । नाद्य तासां गुणानामभ्यर्चना क्वापि भवति । या विशिष्टतास्ताभिः स्वजनुषैव सार्धं प्राप्ताः सन्ति ताः सर्वत्रावज्ञायन्ते न्यक्क्रियन्ते च । स्फाटिकीमालाकारं कविम्प्रति नेदं सर्वं कदापि सह्यम् । समाजे नार्यवज्ञाविषयको महान् दोषः समुद्भूतोऽस्ति कविस्तं महान्तं दोषं समाजाद् दूरे नेतुमभिलषते । स तं दोषमुन्मूलयितु मुत्सादयितुञ्च कामयते । सः समाजस्य समक्षे नार्याः महनीयतां महत्तां च स्थापयितुं कृतिं स्वकीयामेतामवतारयति ।

कविर्मङ्गलाचरणादेव नार्याः उत्कृष्टतमत्वं ज्ञापयितुमात्मानं प्रवर्तयति । स 'यो हि शङ्करः काममपि भस्मीचकार स एव विष्णोर्मोहिनीरूपश्रियिमुह्यतिस्म' इत्येतदुद्‌गीय भङ्ग्या नार्याः सर्वविजेत्रीत्वं व्यनक्ति । या नारी शर्वस्यापि विजेत्री तामेवाद्यतनेऽनेहसि जना अवमन्यन्ते ताम् 'अबलेति ब्रुवन्ति इत्येतत् सर्वमपि कथनीयं कथनमादावेव श्लोकेऽस्मिन्' (म जयतित्यादौ) सन्निवेशयति वा ध्वनिना गृणाति ।

नार्यस्तु निदधत्यजय्यां शक्तिम्। तासु शङ्करबलव्यर्थकारि बलं विद्यते । यं मदनं त्रिनयनो ददाह तमेव मदनं ता जीवयन्ति। अहो जयन्ति जयन्ति नार्यः । आश्चर्यमाश्चर्यं महत् । एतादृशीमनन्यगां शक्ति या बिभ्रति तास्वेव जनोऽद्यतनः सामान्यधियं निदधाति, तां न्यक्करोति, ताम् मन्यतेऽबलाम् तासु तु जनेनादरधीः निधातव्या तासां पुरस्तेन नतेन भवितव्यं; मन्तव्याश्च ताः परमबलवत्य इत्येतत् कृत्स्नतया कविना निगद्यते । तदीयोक्तिरियं "दृशा दग्धं मनसिजं जीवयन्ति दृशैव याः, विरूपास्य जयिनीस्ताः स्तुमो वामलोचनाः" श्लोकमिमं सम्यक् स्मारयति । नयनार्धेनैव इत्येतेन सः मदनं जीवयितुं न साधनविशेषाङ्गीकरणस्यापेक्षां मन्यन्ते तासां कटाक्षपातमात्रं पर्याप्तं मत्वातस्यैवोपयोगं ताः कुर्वन्ति। तास्वपि लोकोऽयं सामान्यधियं निबध्नाति! अहो नारीषु तु अद्भुत-

सञ्जाताः, न पुरुषात् ता अवरा मताः सञ्जाताः ; न च ताः कदाप्यनादृता अवज्ञाताश्चाभूवन् । सत्यम् अहिंसा च पुरातनेऽनेहसि सततमादरमलभेता- मित्येतस्माच्च कारणादिह नारीणां कृते सर्वेऽप्युन्नतिकारका अधिकाराः प्रदत्ता अभवन् । नार्याः शिक्षितत्वात् तज्जीवनस्याध्यात्मिकतार्चनकारित्वात् परिवारे सर्वतः आनन्द एवानन्दो दृष्टोऽभूत् । तस्याः परिवारः स्वपतिं स्वपुत्रं स्वपुत्रीं च यावदेव न सीमित आसीत् । ननान्दा, श्वश्रू, श्वशुरः, देवरो ज्येष्ठोऽन्ये च बान्धवाः सर्वेऽपि तस्याः परिवार एव सन्निविष्टा अभूवन् । सा परिवारस्य सर्वानपि सदस्यान् प्रति स्वकीयं कर्त्तव्यं पालयितुमनिशं जागरूकावाप्यत । न कोऽपि कदापि तां कर्त्तव्यच्युतां वा कर्त्तव्ये प्रमादमाचरन्तीमवाप्नोत् । प्रातःकालादेव सा स्वसेवाभारं सहर्षमवाक्षीत् । निशाया गम्भीरमन्धकारं यावत् सा स्वकर्तव्यं सम्यङ्मनोयोगपूर्वकं विदधती वीक्ष्यते स्म । सा स्वसद- नस्य राज्ञ्यासीद्[1] दास्यपि । परं हन्त, सा स्वप्नेऽप्यात्मानं दासीं नामन्यत-इत्यत्र तदीया महत्ता तदीया श्रेष्ठता सन्निहिताभवत् । गृहे सर्वेऽपि तां गृहस्वामिनीं मन्यमानास्तत्र तथैव व्यवाहरन् यथा स्वामिनि तदितरजनानां व्यवहार आचा- रश्चापेक्ष्येते । वस्तुतो भारतीया नार्या जीवनं सदा दयामयं, ममतामयं, त्याग- मयं, तपस्यामयं, पतिभक्तिमयमवालोक्यत । सा पतिपुत्रादिस्वजनादिहितायो- पोषिता प्रत्यलक्ष्यत । परिवारः सुखसमृद्धिमयः स्यादित्येतदर्थेतोः सा भगवन्तं परमेश्वरं प्रार्थयन्ती प्रैक्ष्यत । समये सत्यागते सा स्वजीवनमप्यर्पयन्ती दृष्टा- भवत् । न सा जीवनार्पणे कदाप्युद्विजते स्म । पत्यौ सा यां श्रद्धां यञ्च विश्वासं पर्यपुष्णात् सा श्रद्धा स विश्वासश्च कदापि तु यात्यन्धविश्वासम् । तस्मात्कारणात् यत् तयोन्मीलिताभ्यां लोचनाभ्यां प्रेक्षणीयमस्ति तत्रापि सा निमीलितनयना सञ्जायते स्म । न सा कदापि पत्युर्निन्दामसहत न चापमान- मेव मार्ष्टि स्म । या भारतीय नारी ह्रीभारात् प्रणता भवन्ती कस्यापि पुरः शिरसः समुत्थापनेऽपि त्रस्यति सा पत्युरवमाननायाः समये चण्डिका सञ्जायते । वस्तुतो न भारतीया योषित् परिवीक्षिताभूदिन्द्रियलोलुपा । सा आत्मनः उपरि

१–ऋग्वेदः १०।८५।४६।

पूर्णं नियन्त्रणं निधाय स्वकर्त्तव्यानि सम्यग् जुगोप। नात्र सन्देहो यद् भारतीयाया नार्या जीवनं यज्ञाय अकल्पत। सा मृत्युं यावद् यज्ञमयं जीवनं धारयन्त्यजीवत्। सर्वथैव भारतीयाया नार्या जीवनं देशान्तरस्य नारीणां कृतेऽनुकरणीयं स्पृहणीयं जीवनमभवत्।

पुरा नारीणां समाजे, गृहे च य आदरः समवालोक्यत न स आदरस्तासु दृश्यते। नाद्य तासां गुणानामभ्यर्चना क्वापि भवति। या विशिष्टतास्ताभिः स्वजनुषैव सार्धं प्राप्ताः सन्ति ताः सर्वत्रावज्ञायन्ते न्यक्क्रियन्ते च। स्फाटिकीमालाकारं कविम्प्रति नेदं सर्वं कदापि सह्यम्। समाजे नार्यवज्ञाविषयको महान् दोषः समुद्भूतोऽस्ति कविस्तं महान्तं दोषं समाजाद् दूरे नेतुमभिलषते। स तं दोषमुन्मूलयितु मुत्सादयितुञ्च कामयते। सः समाजस्य समक्षे नार्याः महनीयतां महत्तां च स्थापयितुं कृतिं स्वकीयामेतामवतारयति।

कविर्मङ्गलाचरणादेव नार्याः उत्कृष्टतमत्वं ज्ञापयितुमात्मानं प्रवर्तयति। स 'यो हि शङ्करः काममपि भस्मीचकार स एव विष्णोर्मोहिनीरूपश्रियिमुह्यति-स्म' इत्येतदुद्गीय भङ्ग्या नार्याः सर्वविजेत्रीत्वं व्यनक्ति। या नारी शर्वस्यापि विजेत्री तामेवाद्यतनेऽनेहसि जना अवमन्यन्ते ताम् 'अबलेति ब्रुवन्ति इत्येतत् सर्वमपि कथनीयं कथनमादावेव श्लोकेऽस्मिन्' (म जयतित्यादौ) सन्निवेशयति वा ध्वनिना गृणाति।

नार्यस्तु निदधत्यजय्यां शक्तिम्। तासु शङ्करबलव्यर्थकारि बलं विद्यते। यं मदनं त्रिनयनो ददाह तमेव मदनं ना जीवयन्ति। अहो जयन्ति जयन्ति नार्यः। आश्चर्यमाश्चर्यं महत्। एतादृशीमनन्यगां शक्ति या बिभ्रति तास्वेव जनोऽद्यतनः सामान्यधियं निदधाति, तां न्यक्करोति, ताम् मन्यतेऽबलाम्, तासु तु जनेनादरधीः निधातव्या तासां पुरस्तेन नतेन भवितव्यं; मन्तव्याश्च ताः परमबलवत्य इत्येतत् कृत्स्नतया कविना निगद्यते। तदीयोक्तिरियं "दृशा दग्धं मनसिजं जीवयन्ति दृशैव याः, विरूपास्य जयिनीस्ताः स्तुमो वामलोचनाः" श्लोकमिमं सम्यक् स्मारयति। नयनार्धेनैव इत्येतेन सः मदनं जीवयितुं न साधनविशेषाङ्गीकरणस्यापेक्षां मन्यन्ते तासां कटाक्षपातमात्रं पर्याप्तं मत्वातस्यैवोपयोगं ताः कुर्वन्ति। तास्वपि लोकोऽयं सामान्यधियं निबध्नाति! अहो नारीषु तु अद्भुत-

मेवबलं विराजते। यो मृत्युमपि जयति तस्यापि बलमेता नार्यो व्यर्थतां नयन्ति। एतास्तु मृत्युञ्जयस्यापिजयिन्यः। यो जनो न भवति तासु प्रणतः सोऽस्ति महान् मन्द इत्येतत् कविः श्लोकेनानेन ध्वनयति। वस्तुतः कवेः कृतिरियमारम्भादेव सहृदयहृदयं हरन्ती भृशमुपसरति।

यत्र सकलानपि दुष्टान् ध्वंसयितुं प्रभविष्णुश्चण्डशक्तिर्दृष्टाभवत्, यत्र चण्डमुण्डशुम्भनिशुम्भादिव्यापादनकारिणी दुर्गा अजायत; यत्र सीता बभूव या रामस्यापि मनो जहार; यत्र सा राधाभवद् या कृष्णस्यापि हृदये वसतिं विधातुं प्राभवत्; यत्र प्रकृतिरप्यात्मानं सन्निवेशयन्ती स्वकीयं गौरवमवगच्छति; यत्र विद्याधिष्ठात्री देवी सरस्वत्यपि शोभते किञ्च यत्र धनाधिष्ठात्री देवता लक्ष्मीरपि विद्योतते तत्रापि 'अबला इत्येतद् विधाय मतेरवस्थापनं बुद्धिरहितत्वं यदि न तदा किमन्यदित्येतत् 'चण्डीं दुर्गाम्' इत्येतदाद्यभिधाय कविर्नितान्तवैदग्ध्येन जनान् भर्त्सयति।

'अहह, या स्वस्तन्यं पाययित्वा असंख्यातान् जनान् पोषयति तामेव लोकोऽयम् 'अबला, अबला' इति वदति किमिदं विमूढत्वं न' इत्येतदभिधाय तस्याः शक्त्यां कियत् मदयत्वं, कियच्चजनपरिपोषणविषयकं क्षमत्वं तस्यां सन्तिष्ठते इत्येतदेकतः प्रथयत्येकतश्च कविरहर्निशं तदीयं तत्सामर्थ्यं वीक्षमाणोऽपि लोकोऽबलेत्युक्त्वा तस्या अनन्तं सामर्थ्यमवजानातीति व्याहरति सखेदम्।

'अबला' इत्येतेन नाम्ना वनिताया अपकृष्टत्वं निकृष्टत्वं दीनत्वं च व्यक्तं सञ्जायते। तन् नाम्ना पदेन वा तस्या आह्वान मतितरामनुचितं मत्वा कविस्तस्या मार्दवं, तस्या नवनवानन्दप्रदर्भणीयत्वं, तदीयानां नेत्रनासाद्यङ्गानां सुखप्रदत्वञ्च वर्णयितुमद्भुतामेव वर्णनसरणिं संश्रयते।

'सन्तानपरा परमा ......' इत्येतदादि व्याहृत्य कविर्जगतः समक्षे नार्यास्तं महिमानं निदधाति यो हि नान्यत्र क्वापि दृश्यते। मातुर्गरीयांस्तु न पिता न च गुरुः। सा तु स्वर्गादपि गरीयसी मातास्ति। मातृमान् पितृमान् इत्येतदादि शास्त्रीयवाक्येन मातुः श्रेष्ठत्वं स्पष्टमेव स्वीकृतमस्ति। सा शक्तिः केन प्रकारेण श्लाघ्येत या सिंहं गजञ्च वशयतां नयति। अस्त्यवश्यमेवातः सा

शक्तिर्वन्दनीया ।

सामर्थ्येऽपि ····· इत्येतदादिपदपङ्क्त्या कवी रमण्या किमप्यद्भुतमौदार्यं मयदानप्रवणत्वं प्रकटीकरोति ।

यत्र यत्र वस्तुनि वनितायाश्चित्रं चकास्ति तत् तद् वस्तु जनः क्रेतुं प्रवर्तते । एषा विशिष्टता तु तस्याः शक्तेर्दिव्यत्वं सूचयति सा शक्ति रबलेति कथं वक्तुं शक्या ! अबलापदन्तु तां तद्गरिम्णो भ्रंशयति ।

कवेर्वन्दनीया वाणीं, यां हि स नारीमधिकृत्य शंसति, लोकः शृणुतात्

············जननीरूपा नारी ।
सर्वेषां प्राणिनां पूज्या ।। १२

नार्याः अबलात्वं नानायुक्तिभिः प्रतिवदन् कविस्तानेव जनान् अबलान् मन्यते साधयति च ये तासु कुर्वन्ति बलात्कारम् ।

अस्ति नारी जीवजनुर्दात्री । अस्ति सा रागकारिणी शक्तिरित्येतन् नारी निदधाति महत्तामिति कविरुदीरयन् स तत्र नरचरितचित्रणकारिणीं विधेस्तूलिकामुत्प्रेक्षते ।

सभाजनीयं वस्तुतो नार्याः सौन्दर्यं यदवलोक्य जनस्य नेत्रे निर्वाणमानन्दं लभेते । यस्माद् वस्तुन आनन्दमधिगच्छति मानवस्तस्माद् वस्तुनः किमन्यद् वस्तु भवितुमर्हत्यतो नारीतः परं नान्यत् किमपि जगतीति सिद्ध्यति । अतिशयोक्तिरिह विलसति ।

नाम्नापि नारी हृदये आह्लादं[1] जनयति । स्वास्थ्यार्थं, स्वास्थ्यवृद्ध्यर्थञ्च प्रसन्नता अपेक्ष्यते । न तामन्तरेण स्वास्थ्यस्य लाभः सम्भवः । गीतायामप्युक्तम्-

प्रसादे सर्वदुःखानां हानिरस्योपजायते ।
प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठते ।।२/६५

नार्या आह्लादजनकत्वात् तस्या वृष्यतमत्वं मतम् । तत्रत्योऽयं प्रभावस्तामनन्यगं प्रकर्षं नयति ।

१– नामैव स्त्रीति पेशलम् । (वक्रोक्तिजीवितम् , २/२२)

यत्र सुन्दरतासरित् सरयं नखतः शिखां यावत् प्रवहति, कवयो [1]यदीयायाः सुषमाया वर्णनाय काव्यं रचयन्ति; यदीयायाश्च कमनीयतायाः सीमा न केनाप्यवाप्तास्ति सा नारी नूनं जगत्यामस्यां मूर्धन्यं स्थानमध्यास्ते। कविर्नार्यारुत्कृष्टतमत्वमुपपादयन् अद्यतने जगति नारी संख्यां वह्वीं प्राप्य मनोविनोदिना विधिना सांख्यमतं[1] पुरुषवहुत्वमाक्षिपति ।

हसितं, रुदितं, कथितं सर्वमपि नार्याश्चेतोहरतीति निगद्य कविरन्यैश्चानेकप्रकारैर्नार्यारवलात्वं निरस्यन् वीक्षितो भवति। अद्य प्रायेण सर्वेष्वपि विभागेषु कार्यमनुतिष्ठत् स्त्रीवृन्दं परिवीक्ष्य कवि "र्नाधीयातां स्त्रीशूद्रा" वित्येतत् कथनमुपहसन्निव प्रतिभाति ।

गौरवशालिनी[2]त्वान्नार्याः क्रियते तत्पदस्य प्रथममुपस्थापनं; तस्या माहात्म्यं तद् गायतीत्येतत् कविः सम्यगुपपादयति ।

'अस्ति नारी गृहस्य जीवनं, शोभा, सर्वस्वञ्च । अतएव तु गृहिणी एव गृहमुच्यते । तां विना भवनं भाययति । तस्यां विद्यमानायां गृहं नानाविधभावपूर्णमपि सुरसदनायते' कविरिदं "भार्याऽभावे भवनम्......" इत्यादिश्लोकं निधाय नार्याः परमापेक्षितत्वमुद्घोषयति ।

नारी न केवलं पुरुषाकर्षिणी सा तु देवान[3]प्यावर्जयत्यतः सा काप्यनिर्वचनीयैव देवीति कविना "आकर्षणे प्रवीणा... " इत्यादिपदपङ्क्त्यां सत्यमेवाभिहितम्। "तस्याः सन्निकर्षे धीरधीः विद्वानपि दुःखदानि नानाकष्टानि सांसारिकाणि विस्मरति । नान्यत् किमपि ततोऽधिकतरं मोहकारकम् । सहनशीलतायां तु सा कदाचित् सर्वसहां क्षमा (पृथिवीम्) मप्यतिशेते" कविरित्येतत् सर्वं नार्या महिम्नि आचक्षाणो धरण्याःषड्रसप्रदत्वमुक्त्वा नार्याः प्रभूतविविधरसप्रदत्वाद प्रस्तुतप्रशंसया तां प्रशंसति । गगनाच्च तस्या गुरुतरत्वञ्च निरूप्य सः (कविः) स्वकीयामद्भुतां विदग्धतां दर्शयति । "एको नर......", "यावन्न हि सन्तुष्टा......" "पितरौ त्यक्त्वा धीरा......" इत्येतदादिश्लोकत्रिकेण कविना

१– सांख्यदर्शनम् , (१/१४६)

२– 'सीतारामौ, पार्वतीपरमेश्वरौ, राधाकृष्णौ,' इत्यादौ सर्वत्र प्रथमप्रयोगो दृश्यते ।

३– सूर्यो देवीमुषसं रोचमानाम्............

नार्या महत्तायाः प्रतिपादने या सृतिरङ्गीकृता सापि वर्तते आदरणीया ।

स्वसुतस्य कृते यौवनमपि जुहोति । सा पुत्रस्य परिपोषणार्थं स्वस्वास्थ्यस्यापि न कदापि चिन्तां कुरुते । अस्ति सा ममतायाः प्रतिमा । तत्र मातृत्वं निषीदति अतः सास्ति पूज्यतमेति कथयित्वा कविर्भारतीयायाः संस्कृतेः सर्वोत्तममादर्शं प्रस्तवीति । पूज्यत्वात् तस्या न सा कदाप्यवमन्तव्या[1] ।

"संख्यावन्तोऽसंख्याः······" इत्येतदादिश्लोकेन पुनः कविः परोक्षतया नार्याः महनीयतां निदधाति; वक्ति च विना नारीं पुरुषोऽस्ति पङ्गुः । न सः स्वजीवने गतिं प्रगतिञ्च कर्तुं शक्नुते[2] । नार्या महत्त्वस्य प्रतिपादनार्थं सांख्यमतां प्रकृतिं निर्दिशति कविः । अतः स भृशं चेतोऽपि मृणाति । एवमेव शक्त्या सहैव शिवो भवत्याराध्यस्तामन्तरेण तु सः शिवोऽपि मोघतां प्रपद्यते इत्येतेन कविना नार्या अप्रत्यक्षतया यन्माहात्म्यं प्रतिपादितं तदपि परमहृद्यम् । यस्यै विवेकीजन एव रोचते तां को न स्तुवीत शक्तिम् ?

न कविर्मातृरूपां नारीं प्रशंसन् स्तुवंश्च तृप्यति । तृप्तिं कथं स गच्छेत् सा तु अर्थाभावेऽपि नापत्यमुज्झति यदा पितापि जहाति तनुजम् ।

कविर्नार्याः शान्तिप्रदत्तां त्रियामायाः शान्तिप्रदत्तामिव कथयित्वा तस्याः (नार्याः) कुलजात्वे, तस्यामागतान् धीरता-सहिष्णुतादिकान् गुणान् प्रस्तुतीकृत्य न केवलं तस्या महत्त्वमस्माकं पुरतो निदधाति परं सः सर्वेषामपि कृते शिक्षां ग्रहीतुं सदवसरमपि ददाति ।

जीवजन्मदात्रीत्वं नार्याः सनातनकालाद् दृष्टं भवतीत्येतद् निगदता कविना युवनाश्वस्य[3] चर्चा कृतास्ति । तया सः तां पौराणिकीं कथां स्मृतिसरणिमध्या-

---

१— अतश्चिदा जनिषीष्ट प्रवृद्धो मा मातरमभुया पत्तवे कः ॥

(ऋग्वेदः, मं० ३, सू० १८, मं० १)

२— पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य ।
पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्गः ॥ (सांख्यकारिका, का० २१)
प्रकृतेः सुकुमारतरं न किञ्चिदस्तीति मेमतिर्भवति ।
या दृष्टास्मीति पुनर्न दर्शनमुपैति पुरुषस्य ॥ (,, ,, ६१)

३— युवनाश्वस्य तनयश्चक्रवर्ती जजान ह ॥ (श्रीमद्भागवतम्, ९।६।३०)

रोपयति ।

"रम्भाद्या अप्सरसस्तत्रापि भवन्ति कृतकार्या:" इत्येतत् कविर्नार्यास्तमपि विशिष्टं गुणमुद्भावयति येन सा असम्भवमपि सम्भवं विदधाति ।

नारीं त एव जना ज्ञातुं भोक्तुञ्च प्रभवन्ति ये सन्ति विवेकवन्तः सहृदयत्ववन्तश्च; तदितरे न । एतेनापि नार्याः सा विशिष्टता पुरः उपस्थिता जायते यान्यत्र न दृश्यते । कविर्नार्याः प्रकृष्टतरतां नानाविधतयावगमयति ।

श्लेषमाश्रित्य कविना नार्या सेतुतारोपितास्ति या, सा भृशं प्रीणाति मनः। या जगद्भरं वहति सा कथं न वर्तते नमस्करणीया । नारी रवे रश्मिरिवेति कथनं युक्तमेव । यतोहि सापि रश्मिरिव पुरुषमुपकुरुते । अत्रत्या पूर्णोपमा भृशं मनस्तोषयति । धन्येयं नारी या वैधव्यमपि कठोरतमं सहमाना नीरवतया पर्यवलोकिता भवति । कविकृतमिदं नार्या वैधव्याग्निसहनपरकं वर्णनं वेपयत्यतितराम् । मदिराक्ष्यां मदिरात्वारोपणं, तत्र च (नार्यां) अमृतलतात्वारोपणमथ च तद्रूपे रसाञ्जनारोपणं नितान्तं हृद्यं युक्तं च । कविरत्र रूपकेण सहृदयान् प्रीणयति ।"स्वीया वा सामान्या···"इत्येष श्लोकः स्वकीयांपरकीयां च चित्रितां विदधाति किञ्चोभयविधयोरपि नायिकयोर्धर्मं प्रदर्शयति । मन्ये कविरुपदिशति यन्मानवः परकीयातो दूर एव सन्तिष्ठेत । धिक् पुरुषं यः पुत्रात् यौवनं गृहीत्वा भोगे भवत्यासक्तः । अतः परं किं भवेन्निन्द्यत्वम् । कविर्ययातिकथां[1] स्मारयन्निह जनन्या यां विशिष्टतां निदधाति तस्या पुरः सादरं मौलिः प्रणतो जायते । मातुर्महत्ताया आकलनार्थं 'जनमानसैकहंसी·········' इत्येतदादिश्लोके यच्चारुत्वमभिव्यक्तीकृतं तदपि मातेवास्ति सभाजनीयम् । एकत इह मातुर्महनीयता कविना विभाविता; एकतश्च मातृभाषायाः । मातृभाषाया हंसीत्वं वंशीत्वञ्च कियन्मधुरमनुप्रासश्च कियान् मधुरः ।

सुभगायाः प्रियतमायाः सान्निध्ये नरस्त्रिविधान्यपि दुःखानि विस्मरति । ज्ञायते सा तापरोगहारिण्यस्ति, नरस्योपकारिणीतु सास्त्येव सर्वथैव । अस्ति सा विपत्सहचरी । अतः कविना सा नारायणीतनुत्वेनोपमितास्ति । नरस्येति पदं

१— इति प्रमुदितः पूरुः प्रत्यगृह्णाज्जरां पितुः ।। श्रीमद्भागवतम् (९।१८।४४)

श्लिष्टं वर्तते। तदर्जुनपक्षेऽपि घटते। नारी प्रियतमारूपेण मानवं रमयत्यत आनन्दं मानवोऽधियाति । इत्थं क्वचित् कविर्नार्यारानन्दप्रदत्वात् तस्या उत्कृष्टत्वं प्रस्तवीति; क्वचित् स्वप्राणवल्लभस्य विषमास्वपि परिस्थितिषु संरक्षणकारित्वान् नार्याः कविस्तां नारीं विधातृप्रदत्तकवचमिवावगच्छति; गृहिणीरुग्णता भवति नितान्तकष्टदा; तस्या रुग्णतायां गृहस्यावस्थास्तव्यस्ततामुपैत्यतस्तद्रुग्णता तु भूभुजोऽपिदुनोतीत्यभिधाय एतेन नार्याः सदैवनिरामयत्वमेवेष्टमिति क्वचित् स वक्ति; शुम्भनिशुम्भयोः पुरः सुरा अपि अभैषुर्यदा, तदा दुर्गा चण्डिकैव तौ व्यापाद्य लोकमुपचकारेत्येतदुद्गीय क्वचित् कविरसना नारी जयति जयतीति गृणन्ती श्रूयते; नानाविधवसुशालिनीत्वाद् वसुमत्या अभ्यन्तरे किं किमिति न कोऽपि वेत्ति यथा, तथैव नार्या हृदये किं किं रहस्यं निषीदतीति न कोऽप्यवयातीत्येतन्निगद्य क्वचित् सः (कविः) नारीं रहस्यवतीं प्रतिपादयति; 'दिवससंख्यां तिथिसंख्यातिशेते' इत्युक्त्वा च कवि (स्तिथीनां स्त्रीलिङ्गत्वात्) नार्याः क्वचिद् बाहुल्यं ज्ञापयति; बोधयति च यज्जनतन्त्रशासने तेषामेव नेतृत्वं भवति ये सन्ति बाहुल्यभृतोऽनेनापि प्रकारेण नार्याः उत्कृष्टत्वं साधयति सः। रागिणीनां षट्त्रिंशत्वमपि स उक्तकथनपक्षे निदधाति । तदेवं स बहुविधतया नार्याः प्रबलमुदग्रत्वं प्रतिपादयन् प्राप्यते ।

कवेरुक्तिरियं 'यत्रानादर आसां गच्छति लक्ष्मीः······' मनो 'यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः' इत्येतद्वचनं स्मारयति। एवमेव 'पुरुषं रक्षति यत्नात्······',' इयमेव धृतिर्ममता··· ···', 'इयमेव आद्याशक्तिः ···' इत्येतदादिका पङ्क्तीः कवेर्यदा पठामः शृणुमो वा तदा ऋग्वेदस्य—

अहं राष्ट्री सङ्गमनी वसूनां चिकितुषी प्रथमा यज्ञियानाम् ।

(१०।१२५।३)

अया सो अन्नमत्ति यो विपश्यति यः प्राणिति य ईं शृणोत्युक्तम् ।
अमन्तवो मां त उप क्षियन्ति श्रुधि श्रुत श्रद्धिवं ते वदामि ।।

(१०।१२५।४)

इत्येतदादिका मन्त्रा स्मृतिसृतिं पुनन्ति । वागम्भृणीं देवतां सादरमुपश्लोकयन्, मन्ये, ऋग्वेदस्तां शक्तिमेवाद्रियते या महिलादिसंज्ञया जगति प्रथते ।

'ब्रह्माण्डार्धदेशात्······' इत्येतदाश्लोकेन कविना नार्याः नरतुल्यत्वं यदुक्तं तत् सत्यमेव। मनोरधोलिखितः श्लोकः कवेस्तद्वचः परिपुष्णाति—

द्विधा कृत्वाऽऽत्मनो देहमर्धेन पुरुषोऽभवत्।
अर्धेन नारी तस्यां स विराजमसृजत् प्रभुः॥

(मनुस्मृतिः, अ० १, श्लो० ३२)

"ततो विराडजायत विराजोऽअधिपूरुषः।
सजातोऽअत्यरिच्यत······················" (पुरुषसूक्ते)

इत्येष मन्त्रो विराजो विभिन्नरूपत्वासादनं वर्णयन् यां नारीं विराजोऽपरं रूपं बोधयति। अथ च 'श्रीश्च ते लक्ष्मीश्च पत्न्यौ······' इत्येतदादिमन्त्रः श्रियं लक्ष्मीञ्च यस्य पत्नीत्वेनाचक्ष्य नार्या एव प्रच्छन्नतया समृद्धिप्रदत्वं कथयति, कथयति च तां 'वैभव'मिति सास्ति समेषामप्यादरास्पदम्।

'विष्णोर्माया नारी······'इत्येतदादीनि पदानि सन्ति गम्भीरार्थानि। एतैर्वैष्णव्याः शक्तेस्तस्या वर्णनं कृतं यस्याः प्रभावात् किमपि तन्न यन्न स्यात् स्पृष्टम्। कविरिह नार्या विष्णोर्मायात्वेनावदातं व्यापकं महिमानं गायन् दुर्गासप्तशत्याः कांश्चन श्लोकान् स्मारयति; अत्र श्लोकद्वयमेव निधीयते—

त्वं वैष्णवी शक्तिरनन्तवीर्या
विश्वस्य बीजं परमासिमाया।
सम्मोहितं देवि समस्तमेतत्
त्वं वै प्रसन्ना भुवि मुक्तिहेतुः॥११।५

विद्याः समस्तास्तव देवि भेदाः
स्त्रियः समस्ताः सकला जगत्सु।
त्वयैकया पूरितमम्बयैतत्
का ते स्तुतिः स्तव्यपरा परोक्तिः॥११।६

हन्त यास्ति शक्तिर्या च माया या च परमेश्वरी जगति नारीरूपमाधाय सर्वत्र विराजते तामेव नारीमद्यतनं तद् भारतं, यत् प्रत्यहमर्चति दुर्गासप्तशत्याः पाठं कृत्वा आश्विनमासे चैत्रमासे च यस्या अर्चनाय समारोहविशेषमारचयति, अवजानीते, 'अबले'त्युक्त्वा च न्यक्कुरुते।

नारी तेषामेव कृते भवति नरकद्वारं किं वा विषं ये यम-नियमपूर्वकं

संयमिनो न भवन्तो नारीं सेवन्ते वा तत्रासक्ता जायन्ते, अन्यथा नारी तु सा दुर्गसंसारसागरस्य तारिणी वर्तते । 'योगेनामृतफलदा··· 'इत्येतदादिश्लोकाः कविना ज्ञापयितुमिदमेव विरचिताः ।

नारी राज्यं रक्षितुं प्राणेभ्योऽपि प्रियं स्वकीयं पुत्रं जुहोति । पन्ना धात्री तु इह सुविदिता परं समराजिरे ये सहस्रशो युवानः स्वदेशस्य रक्षार्थं प्राणानपि सहर्षं, सोत्साहं सोल्लासञ्चार्पयन्ति ते कस्याश्चिद् भवन्ति पुत्राः, कस्याश्चिद् भर्तारः । वस्तुतोनार्यां यस्त्यागो दृश्यते सः क्वान्यत्र । इदमेव सर्वं विचार्य कवि " निजनयनाग्रे दृष्ट्वा स्वसुतस्य वधन्तु राज्यरक्षायै···" इत्येतं श्लोकं प्रब्रवीति ।

झांसी-राज्ञी लक्ष्मीः नार्येवासीत् । सा दुर्गेव भूत्वा रणाजिरे सहस्रशः शत्रुसैनिकान् निजघान । तदीयां वीरतां शत्रवोऽपि श्लाघाञ्चक्रिरे । वस्तुतो वीरतायामपि नार्यः पुरुषेभ्योऽग्रगामिन्यः सन्ति । "जाते विदेश राज्ये ·····" इत्यादिभिः पङ्क्तिभिः कविर्वीराङ्गनां नारीं प्रशंसन् प्राप्यते ।

नारी कांश्चन जनान् प्रति सुखकरी, काञ्चन च प्रति दुःखकरी, काञ्चन च प्रति मोहकरी । तस्याः सुखदुःखमोहहेतुना विश्रुतास्ति । कविरिह "कैकेयनन्दिनि········" इत्येतस्मिन् श्लोके दशरथोऽपि कैकेयीं वीक्ष्य मुमोह इति ब्रवीति । सः सावित्र्याः पतिपरायणतां यमजयिनीत्वञ्चालिख्य नार्यास्तान् गुणान् गायति येषां सद्भावात् सा जगति स्वकीयममरं यशो वितनोति । स इह आधुनिकाः काश्चन नारीः नामग्राहं सङ्कीर्त्य नारी कीदृशं महत्त्वं, कीदृशमुज्ज्वलं चरित्रं, कीदृशमोजोवलं विवेकं च वन्दनीयं निदधातीति प्रकटीकरोति । न केवलं वर्तमानकाल गौरवभूता नारीः स उपवीणयत्यपि तु अतीतकालवर्तिनीनां नारीणां गान्धारी-उर्मिला-द्रौपदीनां धवधर्मसंलग्नत्व-तपः परायणत्वाधिकारनिष्ठत्वादिगुणांश्चोच्चै रुपश्लोकयति । जगदिदं विशालं विपुलञ्च । इह दोषा अपि लभ्यन्ते गुणा अपि । मतिमता गुणग्राहिणा भाव्यम् इह जीवन् स गुणानुपासीत, दोषानवजानीयात् , तेभ्यो दूर एव निषीदेत् । न तेषु (दोषेषु) दृष्टिं क्षिपेत् । कदाचिदेतं भावं मनसि निधाय कविस्तं भावं 'रमणीपङ्क्तिषु ······' इत्येतां पदपङ्क्तिमवातारयत् ।

नारी तु नरस्य शोभास्ति न स (नरः) तस्यामुद्विजेत, जुगुप्सेत, क्लाम्येच्च। दृश्यतां तावद् 'विष्णुशिवादिदेवानां पूजार्हतां लक्ष्मीपार्वत्यादिदेव्यो वर्धयन्त्यो दृश्यन्ते। 'विष्णुश्चलया ……'इत्येतदादिश्लोकान् नार्या महत्त्वस्य दर्शनायैव कविररचत्। नारीः प्रशंसन् बहुविधतया कविस्तां चर्चामपि कुरुते यया ज्ञायते यन्नारीहेतोः कः पुरुषः क आसीत् कश्च सञ्जातः। सः कथयति कालिदासो मूर्ख आसीत् परं नारीहेतोः विद्वान् सञ्जातः। तुलसीदासः सामान्य एव जन आसीत् परं रत्नावली तं जगद्विदितरामभक्ते महात्मनि मनीषिणि पर्यणीनमत्। स इदमपि ज्ञापयति यत् नार्यो न केवलं धर्मक्षेत्रे रणक्षेत्रे भक्तिक्षेत्रे प्रसिद्धिमलभन्त तासां प्रसिद्धिः कविकर्मक्षेत्रेऽपि वरीवर्ति।

नारी भवति मानवस्य शुभचिन्तिका। न तदीयं वचोऽवज्ञातव्यं, तासां वचसः सम्मतेर्वा उल्लंघनेन महान् विनाश आपततीत्येतद् बोधयितुं कविः "उल्लंघ्य वचः ……" इत्येतं श्लोकं निदधाति। इत्थमन्याश्च कतिपयविशिष्टतास्तदीयाः प्रदर्श्य सः समुचिता विविधविषयिणीश्चोच्चशिक्षाः अधिगम्य नार्यः कस्मिन् क्षेत्रे, कस्मिन् पदे, कस्मिन् कार्यालये च कार्यं न कर्तुं शक्नुवन्ति। अद्य तत्तत्पदे, तत्तत्क्षेत्रे, तत्तत्कार्यालये सफलतापूर्वकं कार्यं कुर्वतीभिर्नारीभिरिदमप्युद्घोषितं प्रमाणीकृतञ्च यद् अवसरे सति प्रदत्ते, शिक्षायां दत्तायां सत्यां ताः कठिनकठिनतराणि कार्याणि कर्तुं प्रभवन्ति। गुणिगणगणनारम्भेऽद्य तास्वपि कठिनीं पतन्तीं जगत् पश्यति। ताः सञ्जाताः साम्प्रतं सुयोग्याः कला-साहित्य-दर्शन-विज्ञानादिविषयेषु निष्णाताः अतएव ताःसन्ति सर्वत्रादृताः। तासां सुयोग्य विदुषीणां प्राप्त्यर्थमहमहमिकया जना द्रवन्तो दृश्यन्ते। "धावति नर-पुष्कलकः……" इत्येतदादिश्लोके कविरिदमेव वर्णयति। नारी पुरुषं तत्कृतामशुद्धिं चतुरतया बुद्धिमत्तया च मार्ष्टि; सा पुरुषस्य कृते शुभवर्षिणी गङ्गेवास्ति; सानेकविशिष्टताः निदधात्यतः पितुरपि (मातृरूपेण) गरीयसी मता भवति। वस्तुतस्तस्या महत्ताया विशिष्टतायाः उत्कृष्टतायाश्च कीर्तनं न सम्भवम्। कविनात्र स्फाटिकीमालायां तस्याः गुणानां वैशिष्ट्यानां च वर्णनाय यः प्रयासः कृतोऽस्ति तत्र तेन स्तुत्या सफलताधिगतास्ति। तेन-

किं बहुना शुभगमना(ऽ)–
सहमाना तर्जनीकृतां भीतिं ।
स्फाटिकमाला नारी
पुरुषविमोक्षेऽद्भुतं हेतुः ॥

इति स्फाटिकीमालामधिकृत्य किञ्च स्फाटिकीमालोपमितां नारीं लक्ष्यीकृत्य यदुक्तं तत्सर्वथैव सत्यम् ।

स्फाटिकीमालाख्यं काव्यमाधुनिकेषु प्रादुर्भूतेषु नव्येषु नव्यतरम् । परमादितोऽन्तं यावन्नार्या एव वर्णनम् । अतः अमुक्तकत्वमेवास्य मुक्ततरम् । आर्यायां प्रकृतविषयनिरूपणमपि अतिसमीचीनम् । मुक्तककाव्यस्य संस्कृतसाहित्यसंसृत्यामवतीर्णस्य द्विसहस्रवर्षाण्यतीतानीति संस्कृतसाहित्येतिहास आमनन्ति । तस्मात् पुरातनात् कालादनारतं विद्वांसः कवयो मुक्तकेष्वपि स्वकीयामभिरुचि प्रदर्शयन्तो निदधतस्तानि च ते प्रगाढानुरागपुरस्सरमधीयाना दृश्यन्ते । तत्र कारणं वर्तते मुक्तककाव्यस्य स्वीयैवाद्भुता विशिष्टता । तच्छन्दसंयोजनायां वाच्यलक्ष्यव्यङ्ग्यार्थानां सीमानमतिक्राम्यति, अतिक्राम्यति चेतिवृत्तादिपरकामपि ताम् । बन्धुर एव कोऽपि रसबन्धस्तस्मिन्नुच्छलन्नुद्वेल्लंश्च परिस्पन्दते । यत् तत्र (मुक्तके) वस्त्वलङ्कारध्वनीनामलौकिकं सौन्दर्यं तरलं भवन्नृत्यति तद् भृशमेव सहृदयानां हृदयं हरति । काव्यस्य मुक्तकस्य सामान्य मानवीयभावभूः स्वरूपं भूत्वा विभ्राजते । एतद्विधप्रियविशिष्टता तत् (मुक्तकम्) काव्यस्योत्तमोत्तमां कोटिमध्यासयति । मुक्तकमधिकृत्य ध्वन्यालोककारस्यानन्दवर्धनाचार्यस्यास्ति कथनम्–

"मुक्तकेषु हि प्रबन्धेष्विव रसबन्धाभिनिवेशिनः कवयो दृश्यन्ते । यथाह्यमरुकस्य कवेर्मुक्तकाः शृङ्गाररसस्यन्दिनः प्रबन्धायमानाः प्रसिद्धा एव"

मुक्तककाव्यस्य गुणानां सचेतसां चेतसोऽतितरां रञ्जनकारित्वादलङ्कारशास्त्रस्य धुरन्धरा आचार्या रुद्रट-मम्मट–भोजराज-विश्वनाथादिकाः स्वस्वरचनायां तदीयांश्छ्लोकानुदाहरणत्वेन सन्निवेशयन्ति स्म ।

मुक्तककाव्यपरम्परायां हालकवेः गाथासप्तशती, अमरुककवेः अमरुकशतकम् , गोवर्धनाचार्यस्य आर्यासप्तशती, जगन्नाथपण्डितराजस्य भामिनी–

विलासः सन्ति सुविदिताः कृतयः ।

मुक्तकं काव्यं निःसंशयं स्वजनुः समयादेव विद्वद्वरान् रसिकान् रञ्जयन् स्वयशो दिशि दिशि वितन्वल्लोचनगोचरी भवति ।

काव्यानीव मुक्तककाव्यानि जनसामान्यस्य मनोभावान्, विभिन्नासु दशासु उत्पन्नान् मानसिकान् विकारान् कमनीयायां शब्दावल्यां प्रस्तुवन्त्यतो यथातीते काले कवयस्तत्र प्रवृत्ता बभूवुस्तथैव सम्प्रत्यपि ते प्रवर्तमानाः प्राप्यन्ते भाविनि च तेषां तत्र प्रवृत्तिरेवमेत्र परिवीक्षिता भविष्यति ।

प्राचीनेषु मुक्तककाव्येषु शृङ्गाररसोऽङ्गी । स तत्र निर्मर्यादो निरावरणश्च दृक्पथमायाति । परं वर्तमानकालस्य कविभिः स्वमुक्तकानि शालीनानि समर्यादानि च कृतानि सन्ति । अद्यास्मत्करे यदिदं स्फाटिकीमालाख्यं मुक्तक राजते ततः प्राक् (१९७५ तमेशवीयाब्दे) कविवरश्रीप्रोफेसरस्य उमाकान्त-शुक्लस्य मञ्जुल्याया दर्शनस्य सौभाग्यमुपनतमभूत् । तत्रत्यं प्राकृतिकदृश्यानां सजीवं मनोऽभिरामं चित्रणं मानवीयाभ्यन्तरप्रकृतेः स्वाभाविकं विश्लेषणं, भावानां गाम्भीर्यं, व्यञ्जनया परिष्वज्यमानं सौन्दर्यञ्चास्वादयितुं सहृदयाः सदवसरं संलब्धवन्त एव । इयं स्फाटिकीमाला सम्प्रति नैजं किमपि वैशिष्ट्यं विन्दमानास्मत् पुरतो विभाति । अस्माभिर्गतेषु पृष्ठेषु कविनात्र नारीम-धिकृत्य तदीयं महिमानं गरिमाणञ्चाधिकृत्य ये विचारा अभूतपूर्वां पद्धतिं संश्रित्य आविर्भाविता तेऽस्माभिः पर्यवलोकिता एव । इदानीं तत्र अन्या या विशिष्टता द्रष्टव्याः सन्ति तत्रापि दृष्टिराकृष्यते ।

अस्यां स्फाटिकीमालायां कविरादितोऽन्तं यावन् नार्यां विराजमानमुत्कर्षं सुमृदुलायां भाषायामभिव्यनक्ति । भाषाया ऋजुत्वात् तत्र भावाः स्फुटतया प्रतिबिम्बिताभूत्वा स्वसौन्दर्येण सचेतसश्चेतः परिप्रीणयन्ति । भाषायां प्रयुक्ताः शब्दाः स्वसुकुमारतया अर्थाश्च स्वकीययावगमनीयतया सर्वेषामपि विज्ञानां जगतीं तोषयति । काव्ये महिलानां सर्वपक्षगामि यदन्वेषणं विश्लेषणं च कृतमस्ति किञ्च तस्या यदाशंसनमत्र विहितं तद् बुधानवश्यमेव धिनोति। कोमलानां भावानामभिव्यञ्जनायै 'आर्या' छन्दोऽस्त्युपयुक्ततरं छन्दः । मतिमता कविना तदेवेह परिगृहीतम् । यद्यप्यस्मदीयशास्त्रेषु संस्कृत्याञ्चास्म-

दीयायां नारी पूज्या मतास्ति; सा श्रेष्ठा कथितास्ति परं वर्तमानानेऽनेहसि, वर्तमाने च समाजेऽस्मदीये नार्याः अतितरामनादरो दृश्यते । व्यवहारे न तस्याम् आदरधीः प्रयुज्यते । गृहे गृहे नार्योऽवज्ञाता अपि भवन्त्यो दृश्यन्ते । वाचा तु वयं कथयामो यन्नारीषु समताया व्यवहारः करणीयः परं व्यवहारे न समताया व्यवहारं कुर्मः । कविर्मन्ये, काव्येन मुक्तकेनैतेन नारीषु क्रियमाणां वा व्यवह्रियमाणामसमतां दूरीकर्तुमिच्छति । तदीयेयं बलीयसी विद्यतेमहत्त्वाकाङ्क्षा यन्नार्यः समाजे आदृताः स्युः, पूजिताः स्युः; सः (कविः) तासां श्रेष्ठत्वात् समाजे ताः सम्मानिता एव द्रष्टुं बलीयसीमिच्छां निधत्ते । काव्ये–मुक्तककाव्ये-कविनास्मिन् अभिनवैव दृष्टिः स्वीकृतास्ति । मुक्तककाव्यरचनार्थमतीतानेहसि या गतानुगतिका पद्धतिरङ्गीकृतास्ति कविनानेन सा पद्धतिर्नादृतास्ति स्वकीयेऽस्मिन् मुक्तककाव्ये ।

'काव्येऽस्मिन् सर्वत्र प्रसादः' प्रस्फुरति । अलङ्काराश्चानेके काव्येऽस्मिन् स्वशोभया काव्यमलङ्कुर्वन्ति । "······रश्मीरवेरिवेयं पुरुषस्य दशासु सकलासु इत्यत्रोपमा, "भवदवपुरुषस्थाणू रमणी वल्ली··············" इत्यत्र रूपकालङ्कारः, 'कुटिलालकापि सरला·········वामापीयं रमणी" इत्यत्र विरोधः, " अन्धो भवति भुजङ्गः ! ······" इत्यत्र श्लेषः, " यत्रानादर आसाम् ···" इत्यत्र निदर्शना, "अष्टगुणः पुरुषादपि" इत्यत्रोत्प्रेक्षा, "वदनं वचनम्······" इत्यत्र दीपकम् इदं काव्यमलङ्कुर्वन्ति ।

व्यञ्जक-व्यङ्ग्य शब्दार्थानामपि नास्ति न्यूनतात्र । आदावेव प्रथमे श्लोके मृत्युञ्जय जयितीरित्येतेन या मृत्युञ्जयमपि जयन्ति तासामग्रेऽन्यस्तु कः स्थातुं शक्नुते इत्येष भावो ध्वन्यते । ' मदिरेयं मदिराक्षी' इत्यत्र 'मदिराभूतायां नार्यां सत्यामपि जना मदिरां पातुमन्यत्र यान्ति' इति ध्वन्यते 'कुटिलभ्रूलतमस्याः····· ' इत्यत्र सा नावलेति ध्वन्यन्ते । रामां रमणीं तरणीमित्येतानि च पदानि सन्त्यनेकार्थगमकानि । "अभिनवभावा······" इत्येतस्मिन् श्लोके गुणज्ञो रसज्ञो विज्ञ एव रमणीमवबोद्धुं शक्नुते इत्येतद् ध्वन्यते । तदेवं व्यङ्ग्यार्थश्रीरिह समुल्लसति यत्र तत्र ।

नरचरितचित्रवीथीं विविधैर्वर्णैः सुचित्रितां कर्तुम् ।
मृदुला ललिता नारी तूलिरियं निर्मिता विधिना ॥

अस्मिन् श्लोके कविर्नर-चरितंस्वोद्भवं, समुन्नतिं, स्वगुणानां प्रकाशनार्थं सदवसरस्यासादनं मलिनताया अमलिनतायाश्च प्राप्ति नार्याः सन्निधौ कुरुते। वस्तुतो जगति नरस्य चरितं कीदृशमित्येतन्नार्याः सन्निधावेव ज्ञातं जायते। चरितस्य मानवीयस्वरूपं तस्या एव सन्निकर्षे प्राकाश्यं प्रयाति। तत्पारमार्थिकतया तत्रैवाभिव्यक्तिं गच्छति। नार्यास्तन्निर्माणे महद् योगदानं वरीवर्तते। बुद्धिमन्तस्तस्याः साहाय्येन स्वकीयमुत्थापनं कुर्वन्ति; स्वजीवनमादर्शोन्मुखं कर्तुं प्रभवन्ति येन सन्ति बुद्धिमन्तो वा विवेकवन्तस्ते नार्याः सन्निधावात्मानं निपातयन्ति। नारीसन्निधौ नरचरितस्य विविधरूपता द्रष्टुं शक्या भवति अतः कवेर्नरचरितचित्रवीथीमित्येतदादि पदानि परमपेशलानि सन्ति तानि स्वपेशलतायास्तले उपर्युक्तानर्थान् ध्वनयन्ति। इह कवेः काव्यस्यास्योत्तमोत्तमतां विधातुमेकः श्लोकोऽन्यश्च निधीयते—

नखशिखरूपं यस्याः काव्यमुखेनानुभूयते कविभिः।
क्रियते तस्य प्रचारः काष्ठाऽवाप्ता न केनापि ॥

वस्तुस्वरूपस्य वर्णनार्थं कवयो यां पद्धतिमङ्गीकुर्वन्ति न भवति सा सामान्या सा भवति लोकोत्तरैव; तद्व्यक्त्यर्थं यां पदावलिं ते प्रयुञ्जन्ति सापि भवति काप्यन्यैव, तत्र यां भावश्रियं तं सन्निवेशयन्ति साऽपि भवति दिव्यैव, तत्प्रयुक्तेषु शब्देषु किमप्यद्भुतं भवत्यर्थगाम्भीर्यमतः कविप्रतिभावर्णितनारीमुखनयन—नासाचिकुरस्तनाद्यंगसौन्दर्यं लोके दृश्यमानस्य सौन्दर्यस्यानुरूपं भवदपि तद्विधं न समुन्मीलयदात्मानं लौकिकानन्दविजेतारमलौकिकमानन्दं जनमानसे सृजति। नार्यङ्गवर्णने कवेर्मुख्यमुद्देश्यं भवत्यलौकिकानन्देन मानवमानसस्य विनोदनं रञ्जनञ्च न च नार्यङ्गवर्णनस्य प्रमुखं लक्ष्यम्। अतः कविना'काव्यमुखेनानुभूयते कविभि'रिति निगदितम्। काव्यं तद् यत्र जीवनस्य जगतश्च तत्त्वं भवत्युन्मिषितं परिस्फुरितं विद्योतितञ्चेति विदन्ति काव्यविदः साधु। अत्र काव्यपदमेतत्सर्वमपि सम्यग् ध्वनयति। अत्र कविः काव्यमुखादिपदानि व्यापकान्

अर्थान् परिगृह्ययोगस्थितानि सन्ति । तान्याश्रित्योश्वरिनिर्दिष्टानर्थान् अभिव्यक्तीकृत्य 'काष्ठाऽवाप्तान केनापि' इत्येतां पदपङ्क्ति निधाय नार्याश्चरितं भवति दुरवगाहं नितराम् । न तत् सामान्यजनधीगम्यम् । अतएव तु प्रथते लोकोक्तिरियम् स्त्रियश्चरित्रं पुरुषस्य भाग्यं दैवं न जानाति कुतो मनुष्यः । स्त्रियो मतिमतामेवकृते भोग्यात्वेन विधिना विनिर्मिताः इत्येतदिह ध्वनितं भवति ।

काव्येऽस्मिन् वहुलाः पदपङ्क्तयः शोभन्ते यासु व्यङ्ग्यार्थाः सन्ति सर्वथैवौतप्रोताः । विषयोऽत्र नवीनेनैव प्रकारेण गीतोऽतः रचनास्ति स्तुत्या । अत्र कृता हिन्दी टीकावस्त्वगमनेऽस्ति सहायिका । भूयाद् भाविनि कवेः काव्यप्रणयनविषयकः प्रयासः समुन्नततरोऽवदाततरश्चेति प्रार्थ्यते ।

नव्यानि देशजनताहितकारकाणि,
वस्तूनि सन्ति वहुलान्यपि मञ्जुलानि ।
कुर्वन्तु तत्र कवयो निजभव्य यत्नं,
सम्प्रार्थ्यते कविषु सादरमेतदेव ॥

—डॉ० रमेशचन्द्र शुक्लः
एम०ए०, पीएच्०डी०, साहित्याचार्यः, सांख्ययोगाचार्यः
१-२-१९७९ ई०
ए-१/२०३ जनकपुरी, नयी दिल्ली—११००५८

स जयति कामहरोऽसौ
देवेषु गृहीतपुण्यपदरूपः।
मुग्धो दृष्ट्वा विष्णो-
र्मनोहरं मोहिनीरूपम्॥

कामदेव का अन्त करने वाले देवताओं में पुण्य पद रूप ग्रहण करने वाले भगवान् शिव सर्वोत्कृष्ट हैं। वही भगवान् शिव, जो समुद्र मन्थन के बाद विष्णु के मोहक-मोहिनी रूप को देखकर मुग्ध हो गये।



स्फाटिकीमाला

त्रिनयनदग्धं मदनं
नयनार्धेनैव जीवयन्त्यनिशम् ।
मृत्युञ्जय–जयिनीस्ताः –
प्रति नम्रः को न भवितेह ?।१।।

जो त्रिनेत्रधारी भगवान् शङ्कर के द्वारा जलाये गये कामदेव को नेत्र के अर्धभाग (कटाक्ष) से ही निरन्तर जिला देती हैं, मृत्युञ्जय (शङ्कर) को जीतने वाली उन (स्त्रियों) के प्रति कौन नम्र नहीं होगा ?।१।।

चण्डीं दुर्गां सीतां
राधां प्रकृतिं सरस्वतीं लक्ष्मीम् ।
दृष्ट्वा स्मृत्वा नारी–
मबलां वदन्ति बुद्धिरहिताः ।।२।। ✓

चण्डी, दुर्गा, सीता, राधा, प्रकृति, सरस्वती और लक्ष्मी को देखकर और स्मरण करके नारी को मूर्ख व्यक्ति ही अबला कहते हैं ।।२।।

'अबलाबले'ति नारीं
वदति तु लोको विमूढमतिसहितः ।
यत्स्तन्यामृतपानात्
पुरुषा जीवन्त्यसंख्याताः ॥३॥

जिसके दुग्धामृतपान से असंख्य पुरुष जीवन प्राप्त करते हैं, उस नारी को मूर्खबुद्धि लोक ही 'अबला-अबला' इस प्रकार कहता है ॥३॥

यस्याः स्पर्शमवाप्य
प्रतिरोम विराजतेऽभिनवकम्पः ।
सा वनिताऽवनिभागे
'मूढैरबलेति' बहुधोक्ता ॥४॥

जिसका स्पर्श पाकर रोम-रोम में अभिनव स्पन्दन हो उठता है, भूतल पर उस ललना को मूर्खों ने अनेक प्रकार से 'अबला' कहा है ॥४॥

यस्याः स्मरणं कृत्वा
विरहनिमग्ना भवन्ति रसपूर्णाः ।
कान्तामानन्दनवा-
मबलां को वक्तुकामः स्यात् ?॥५॥

जिसका स्मरण करके विरह में डूबे व्यक्ति रसपूर्ण हो उठते हैं, उस नित्य नवीन आनन्द देने वाली प्रियतमा को 'अबला' कौन कहना चाहेगा ?॥५॥

त्वङ्नेत्रश्रुतिनासा-
रसनादिभ्यो ददाति रसकलसम् ।

मूढो रमणीं रामा-
मबलेत्युक्त्वैव दूषयति ॥६॥

त्वचा, नेत्र, कान, रसना आदि से जो रस की गगरी दे देती है, उस रमणी एवं मनोरमा (नारी) को मूर्ख व्यक्ति 'अबला' यह कहकर ही दूषित करता है ॥६॥



सन्तानपरा परमा
वहति च गर्भं सदैव नवमासान् ।
धात्री जगतो जननी
धन्या जायाऽथवा नारी ॥७॥

सन्तान को अत्यधिक चाहने वाली जो श्रेष्ठ नारी नौ मास तक गर्भ धारण करती है, वह जगज्जननी एवं जगद्धात्री जाया (पत्नी) अथवा नारी धन्य है ॥७॥

किञ्च बलादाकर्षति
सिंहं करिणं तथैव बलवन्तम् ।
नित्यं शक्तिसमेता
सा वन्द्या सन्ततं वनिता ॥८॥

और भी, जो बलवान् सिंह एवं हाथी को, बलपूर्वक खींच लेती है, सदा शक्तियुक्त वह वनिता नित्य वन्दनीय है ॥८॥

सामर्थ्येऽपि ददाति
स्वाङ्गं रमणस्य प्रेम वृद्ध्यर्थम् ।
दानपरामिह ललना-
मन्धो बधिरोऽबलां ब्रूते ॥९॥

सामर्थ्य होने पर भी जो अपने शरीर को, प्रियतम को, प्रेम की वृद्धि के लिए समर्पित कर देती है, उस दानशीला ललना को (कोई) अन्धा-बहरा व्यक्ति ही 'अबला' कहता है (अर्थात् कहेगा) ।।९।।

चित्रवशादपि यासां
क्रीयन्तेऽनुपलमनेकवस्तूनि ।
तासामिहाबलात्वं
कः साधयितुं समर्थोऽस्ति ?।१०।।

जिनके चित्रों के कारण ही प्रतिक्षण अनेक वस्तुएँ खरीदी जाती हैं, उनका अबलात्व सिद्ध करने में कौन समर्थ हो सकता है?।१०।।

मिश्रणकालेद्यऽत्वे
पितुः प्रमाणे तु कोऽपि नहि शक्तः ।
मातैवैका कथयति
'तात ! तवासौ प्रियस्तातः ।।११।।

आजकल के मिलावटी युग में पिता का प्रमाण देने में तो कोई समर्थ नहीं है । एकमात्र माता ही (बच्चे से) कहती है कि बेटे ! ये ही तुम्हारे प्यारे पिता हैं ।।११।।

न च मातुर्मातृत्वेऽ-
द्यावधि केनापि कारिता शङ्का ।
जननीरूपा नारी
सर्वेषां प्राणिनां पूज्या ।।१२।।

किन्तु आजतक किसी ने भी माँ के मातृत्व में (किसी

प्रकार की) शङ्का नहीं की है। मातृस्वरूपा नारी समस्त प्राणियों की पूजनीय है ॥१२॥

यैवं विधाऽस्ति धीरा
'स्त्यायेते शुक्रशोणिते यस्याम्' ।
अबला सा स्त्री कथमिव
जानातीदन्न हृदयं मे ॥१३॥

'जिसमें शुक्र और शोणित (रज) बढ़ते हैं' (इस परिभाषा के अनुसार) जो इतनी धैर्यशालिनी है, वह अबला कैसे हो सकती है, यह मेरा हृदय नहीं जानता ॥१३॥

रूपौदार्यगुणासु
श्रेष्ठासु पुनः सदैव रम्यासु ।
कुर्वन्ति बलात्कारं
नरदैत्यास्तेऽबला उक्ताः ॥१४॥

रूप, औदार्य (आदि) गुणों से युक्त, श्रेष्ठ तथा रमणीय ललनाओं से जो बलात्कार करते हैं, वे नर-पिशाच (ही) वास्तव में 'अबल' कहे गये हैं (कहे जाने चाहिएँ) ॥१४॥

सकलाञ्जीवान् सूते
नित्यं सा रागकारिणी शक्तिः ।
अन्धो नहि यदि पश्यति
पुरःस्थितां कस्य दोषोऽस्ति? ।१५॥

वह अनुराग उत्पन्न कराने वाली शक्ति नित्य ही समस्त जीवों को उत्पन्न करती रहती है, यदि अन्धा सामने विद्यमान उसको नहीं देख पाता तो इसमें दोष किसका है ?।१५॥

नरचरित चित्रवीथीं
विविधैर्वर्णैः सुचित्रितां कर्तुम् ।
✓ मृदुला ललिता नारी–
तूलिरियं निर्मिता विधिना ॥१६॥

मनुष्य-चरित्र की चित्रवीथी को भाँति--भाँति के वर्णों से सुचित्रित करने के लिए, विधाता ने मृदुल एवं ललित कूँची के रूप में यह नारी निर्मित की है ॥१६॥

यस्या अभिनवरूपं
दृष्ट्वा किलकिञ्चितं ततोऽप्यधिकम् ।
पुरुषैर्लब्धं शश्वन्
निर्वाणं नयनयोर्लोके ॥१७॥

जिसके नित्यनूतन रूप, और उससे भी अधिक शृङ्गारिक उत्तेजना को देखकर निरन्तर मनुष्यों ने संसार में ही नेत्र-निर्वाण प्राप्त किया है ॥१७॥

हृदयाह्लादं कुरुते
येयं नाम्नाऽपि किम्पुनः साक्षात् ।
वृष्यतमा सैव स्त्री
कथिता चरकादिभिर्भिषजैः ॥१८॥

आयुर्वेद के परम विद्वान् आचार्य चरक ने वृष्य औषधियों का वर्णन करते हुए 'स्त्री' को परम वृष्यतम माना है । इसका नाम भी हृदय को आह्लादित कर देता है, साक्षात् मिलन का तो कहना ही क्या है ?।१८॥

नखशिखरूपं यस्याः
✓ काव्यसुखेनानुभूयते कविभिः ।

क्रियते तस्य प्रचारः
काष्ठाऽवाप्ता न केनापि ॥१६॥

जिसके नख-शिख (के रूप) की कवियों के द्वारा काव्य के माध्यम से अनुभूति की जाती है, और प्रचार भी किया जाता है, परन्तु उसकी सीमा (आज तक) कोई नहीं पा सका ॥१६॥

बह्वी नारी–संख्या
निर्णीताऽद्यापि जगति जनगणकैः ।
पुरुषबहुत्वं सांख्ये
दर्शनमात्रं पुनर्जातम् ॥२०॥

आज भी जनगणना करने वालों ने, (पुरुषों की अपेक्षा) स्त्रियों की संख्या अधिक है- यह निष्कर्ष निकाला है; 'पुरुष-बहुत्व' तो सांख्य में केवल दार्शनिक सिद्धान्तमात्र रह गया है ॥२०॥

वदनं वचनं गमनं
हास्यं रुदितं स्मितं पुनर्मौग्ध्यम् ।
चेतोहरं नराणां
कामबलानां स्वतः सिद्धम् ॥२१॥

स्त्रियों का चेहरा, बोलना, चलना, हंसना, रोना, मुस्कराना और भोलापन, कामाधीन व्यक्तियों के मन को हरने वाला होता है, यह स्वतः सिद्ध है ॥२१॥

प्रतिसीरा–वातायन–
लग्नैः पुरुषैर्विलोक्यते यस्याः ।
अभिनवरूपं व्याजात्
तस्याः केनोक्तमबलात्वम् ॥२२॥

कनातों (चिकों) और झरोखों से लगे हुए पुरुषों द्वारा (किसी न किसी) बहाने से जिसके रूप का दर्शन किया जाता है, उसका अबला होना, किसने प्रतिपादित किया है ?।२२।।

अष्टगुणः पुरुषादपि
कामो युवतीषु मन्यते बहुशः ।
लब्ध्वा प्रबलाधारं
मारोऽसौ विधेयतां याति ।।२३।।

नीतिकारों के अनुसार युवतियों में पुरुष की अपेक्षा काम आठ गुना अधिक होता है । ऐसा लगता है, प्रबल (स्त्री-रूपी) आधार को पाकर यह कामदेव भी इनका सेवक बन जाता है ।।२३।।

वचनं "नाधीयेतां-
स्त्रीशूद्रौ" व्यर्थमेव प्रतिभाति ।
विपुलां संख्यां दृष्ट्वा
विविधक्षेत्रेषु महिलानाम् ।।२४।।

"स्त्री और शूद्र न पढ़ें" यह वचन, विविध क्षेत्रों में महिलाओं की विपुल संख्या को देखकर व्यर्थ ही प्रतीत होता है ।।२४।।

पुनरपि द्वन्द्वे येयं
प्रथमं पुरुषात्समागता पुरतः ।
कस्तस्या माहात्म्यं
शिथिलीकर्तुं विभुः शक्तः ?।२५।।

द्वन्द्व समास में जिसका पुरुष से पहले प्रयोग किया जाता

है, उसकी महत्ता को शिथिल (गौण) करने में कौन समर्थ है? ।२५।।

भार्याऽभावे भवनं
यमभवनं भाति भूभुजां भूयः ।
भार्याभावे तु गृहं
सुरसदनं सौख्यदं दृष्टम् ।।२६।।

पत्नी के अभाव में राजाओं का भवन भी यमसदन जैसा प्रतीत होता है, परन्तु भार्या के होने पर तो घर स्वर्ग के समान सुख देने वाला दिखायी देता है ।।२६।।

आकर्षणे प्रवीणा
पुनरपि नारी सदैव पुरुषाणाम् ।
धावत्युषसं देवीं
सूर्यो गगनाङ्गणे नित्यम् ।।२७।।

नारी सदा से ही पुरुषों के आकर्षण में प्रवीण है, सूर्य आकाश में उषा देवी के पीछे नित्य दौड़ लगाता है । ("सूर्यो देवीमुषसं रोचमानां मर्यो न योषामभ्येति पश्चात्" आदि ऋग्वेद के मन्त्र से यही निष्कर्ष निकलता है) ।।२७।।

यल्लोलालक लीला-
बद्धाक्षो धीर-धीरपि प्राज्ञः ।
विस्मृत्य जगज्जालं
प्राप्नोति महान्तमानन्दम् ।।२८।।

जिसकी चञ्चल अलकों के सौन्दर्य से आबद्ध नेत्रों वाला

गम्भीर बुद्धिमान् भी सांसारिक झगड़ों को भूलकर महान आनन्द प्राप्त करता है ॥२८॥

परगृहगमनं पत्युः
सहते धीरा सदैव सन्नारी ।
तत्पदमपि किं गेहात्
सोढुं शक्तो बहिः पुरुषः ?।२९॥

धीर स्त्री पति के पर(नारी) के घर जाने को भी सहन कर लेती है, परन्तु क्या उसके घर से बाहर एक पग को भी पुरुष सहन कर सकता है ?।२९॥

मधुरादिकमास्वाद्यं
षड्रसजातं ददाति धरणीयम् ।
जलमेव जडं गगनं
दत्वा कृतकृत्यतां याति ॥३०॥

यह पृथ्वी मधुर आदि आस्वाद्य छः रसों को देती है, परन्तु जड़ गगन जल देकर ही अपने को कृतकृत्य समझ लेता है ॥३०॥

एको नरः प्रवीणो
नारीरहितस्तु निर्बलः प्रोक्तः ।
हीनाङ्गुलिरङ्गुष्ठः
किं कुचमर्दे भवेत् शक्तः ॥३१॥

भले ही मनुष्य प्रवीण हो जाय, किन्तु बिना स्त्री के वह निर्बल ही कहा जाता है। अङ्गुलियों के बिना अकेला अँगूठा क्या स्तनमर्दन कर सकता है ? अर्थात् जैसे अकेला अँगूठा व्यर्थ है, उसी प्रकार अकेला नर भी व्यर्थ ही है ॥३१॥

यावन्नहि सन्तुष्टा
नारी तावद् वृथैव पुरुषत्त्वम् ।
अनया प्रमाणितस्य
स्वस्थस्यैवोचिता निद्रा ॥३२॥

जब तक पुरुष अपने पौरुष से अपनी पत्नी को सन्तुष्ट न कर दे, तब तक पुरुषत्व वृथा है । (विशेषतः दाम्पत्य जीवन में) पत्नी के द्वारा ही पुरुष और पुरुषार्थ की परीक्षा होती है । इसके द्वारा प्रमाणित स्वस्थ पति की निद्रा उचित है । (और जिसकी पत्नी तारे गिन-गिन कर रात बिताती हो, उस पति रूपी पातक की निद्रा शवमुद्रा के समान है) ॥३२॥

पितरौ त्यक्त्वा धीरा
श्वसुरगृहं प्राप्य वर्द्धते बाला ।
अस्यास्त्यागगुणानां
शब्दैर्नो कल्प्यते सीमा ॥३३॥

यह धैर्यवती षोडशी (बाला) अपने माता-पिता को विवाह के समय छोड़कर श्वसुर के घर जाकर बढ़ती ही जाती है । जब कि श्रेष्ठ जाति एवं सम्प्रदायों में पति अपने श्वसुरालय में अधिक ठहरना भी अच्छा नहीं मानता । निश्चय ही नारी के त्याग के गुणों की सीमा शब्दों से नहीं बतायी जा सकती है ॥३३॥

जीवनरसं स्वकीयं
यौवनमप्यात्मजस्य सम्पुष्ट्यै ।
दत्वा ममतामूर्ति-
र्माता नहि कस्य सम्पूज्या ? ॥३४॥

मातृ रूप में यही नारी अपने जीवन के रस रूप यौवन

को भी बेटे के पोषण में दे डालती है। यह ममता की मूर्ति माँ किसके द्वारा पूज्य नहीं है?।३४।।

जागर्ति न चात्मजस्य
रात्रौ रावे कदापि तज्जनकः ।
जागृतजननी-स्वङ्के
शिशुरपशङ्कः सुखं शेते ।।३५।।

रात में बच्चे के रोने पर कभी भी पिता नहीं जागता। (बराबर खर्राटें भरता है) तब भी माँ जागती है। और जागती हुई माँ की गोद में बच्चा निःशङ्क, सुखपूर्वक सोता है ।।३५।।

संख्यावन्तोऽसंख्याः
सांख्ये प्रख्यापयन्ति खलु प्रकृतिम् ।
एकः सर्गं सकलं
पंगुः पुरुषः कथं कुर्यात् ?।३६।।

असंख्य दार्शनिक एवं विद्वान् सांख्यशास्त्र में 'प्रकृति' के महत्त्व को स्वीकार करते हैं। अकेला पुरुष तो बिना प्रकृति के पंगु है। वह स्वयं भी नहीं चल सकता, फिर सम्पूर्ण सृष्टि वह कैसे कर सकता है ?।३६।।

शक्तिसमेतः शम्भुः
शिव एव शिवाय पूज्यते तज्ज्ञैः ।
तदभावेऽहं मन्ये
ह्यशिवः शव इव विगतकार्यः ।।३७।।

भगवान् शिव शक्तिस्वरूपा दुर्गा के सान्निध्य के कारण ही शिव हैं। तभी वे कल्याण करने में भी समर्थ हैं और इसीलिए उनके

भक्त उनकी पूजा भी करते हैं । शक्ति के अभाव में शिव 'अशिव' ही रहेंगे, कुछ भी नहीं कर पायेंगे । मेरी ऐसी ही धारणा है ।।३७।।

अर्थाभावे सूनो-
र्मातृत्वे नैव कापि खलु हानिः ।
जनकत्वे पितुरस्मिन्
काले कौटिल्यमायाति ।।३८।।

लोक में देखिये:—पुत्र यदि धन के अभाव से पीड़ित है या उसने जानबूझ कर भी धन का अपव्यय कर दिया है, तब भी माता के मातृत्व में कोई कमी नहीं हो सकती । किन्तु पिता के पितृत्व में इस अवसर पर कुटिलता आ जाती है ।।३८।।

दिननाथेन सनाथाः
दिवसाः सन्तापयन्ति खलु सत्त्वान् ।
शान्तिप्रदा त्रियामा
श्यामा वामा सदैवैका ।।३९।।

दिवस को सूर्य का साथ प्राप्त है । दिवस निश्चय ही प्राणियों को सन्तप्त करते हैं । पर शान्ति तो तीन पहर की रात ही देती है । इसी प्रकार अकेली सुन्दरी श्यामा भी रात्रि के के समान शीतलता और सुख प्रदान करती है ।।३९।।

पित्रादेशाज्जननीं
हन्ति कुठारेण राम एवायम् ।
मात्राज्ञया न पित्रे
द्रुह्यति कन्या कदाप्येका ।।४०।।

पुराणों के अनुसार, अपने पिता जमदग्नि के आदेश से परशुराम ने अपनी माता रेणुका को कुठार से मार दिया था। किन्तु कभी कोई कन्या माता की आज्ञा से, पिता से द्रोह भी नहीं कर सकती; पिता का वध करना तो बहुत ही दूर की बात है ।।४०।।

अत्याचारं भर्तुः
सहते कुलजाऽपमानिता तूष्णीम् ।
क्रुद्धायामपि तस्यां
बुक्कति नरकुक्कुरः प्रायः ।।४१।।

सत्कुल में उत्पन्न वधू पति के द्वारा अपमान एवं मिलने वाले अत्याचारों को भी चुपचाप सह लेती है। और उस पत्नी के क्रुद्ध भी हो जाने पर मनुष्य प्रायः कुत्ते की तरह भौंकता है ।।४१।।

सन्तुष्टा सुखमेत्य
स्वपिति निशामासनञ्च नहि त्यजति ।
अधमः सर्पति भूयो
रात्रिन्दिवमपि भुजङ्गो वै ।।४२।।

कुलजा नारी अपने दाम्पत्य जीवन में पति-सहवास से सन्तुष्ट होकर रात्रि में सुखपूर्वक सो जाती है। किन्तु अधम धूर्त पति पुनः पुनः दिन-रात इधर-उधर घूमता-फिरता है ।।४२।।

संसारानलदग्ध-
श्चिन्ता विषमूर्च्छितोऽपि यदि पुरुषः ।
रामां रमणीं तरणीं
लब्ध्वैवानन्द-परिपूर्णः ।।४३।।

संसार की अग्नि से जलता हुआ और चिन्ता रूपी विष से मूर्च्छित पुरुष दुःखों से उद्धार कराने वाली सुन्दरी रमणयोग्य रमणी को पाकर आनन्द से परिपूर्ण हो जाता है ॥४३॥

इयमेवाद्या प्रकृतिः
सूते सकलान् प्रतिक्षणञ्जीवान् ।
नहि विश्वस्मिन् विश्वे
युवनाश्वाः श्वो भविष्यन्ति ॥४४॥

आदि प्रकृति यही (स्त्री) है। प्रत्येक क्षण सारे जीवों को यही उत्पन्न करती है । जन्म देना केवल स्त्री के ही वश की बात है । सारे संसार में युवनाश्व ही एक अपवाद है, जिसने मान्धाता को जन्म दिया । उसके बाद न कोई युवनाश्व हुआ, न ही आगे हो सकेगा ॥४४॥

यत्र नहीन्द्रप्रभुता,
ब्रह्माद्याः कर्ममोहिता दृष्टाः ।
रम्भाद्या अप्सरस-
स्तत्रापि भवन्ति कृतकार्याः ॥४५॥

जहाँ इन्द्र की प्रभुता भी समाप्त हो जाती है, ब्रह्मादि देव भी कर्ममुग्ध से देखे गये हैं, रम्भा आदि अप्सराएँ वहां भी सफलतापूर्वक कार्य सम्पन्न कर देती हैं । ऐसे–ऐसे असंख्य प्राचीन उदाहरण प्रसिद्ध हैं । आजकल भी युवतियों के माध्यम से अनेकधा कार्यों की सिद्धि देखी जाती है ॥४५॥

मार्दवमासु विधात्रा
किमपि प्रदत्तं मनो विजयकारि ।
कामपताकामेनां
दृष्ट्वैव पराजिताः पुरुषाः ॥४६॥

विधाता ने ललना के ललित अंगों में मन को जीतने वाली एक विशेष मृदुता दी है। वास्तव में यह सुन्दरी कामदेव की विजय- पताका है, इसीलिए इसे देखते ही पौरुषसम्पन्न पुरुष पराजित हो जाता है, अपने हथियार डाल देता है ।।४६।।

बन्धैः सेव्या तटिनी
धीरा सततं सुरायते मधुरा ।
स्वच्छन्दा यदि जाता
नाशायैषा मता कुटिला ।।४७।।

कामशास्त्रोक्त विचित्र सुरतबन्धों से यदि इसका उपभोग किया जाय तो यह धीरा बराबर मधुर सुरा के समान आनन्द देती है । उचित संरक्षण न मिलने पर, यह स्वच्छन्द होकर कुटि-लतापूर्वक नाश कर देती है। ठीक उसी प्रकार जैसे नदी बाँध आदि के द्वारा सुरक्षित होकर उपकार कर सकती है, पर जरा सी असावधानी से वही विनाश कर देती है ।।४७।।

अभिनवभावा सरला
सहृदयहृदयैक-हारिणी रमणी ।
रससागर परिपूर्णा
काव्यलता सेव्यते सुगुणैः ।।४८।।

नये–नये प्रेम भाव से संयुक्त, सरल, सहृदय (नायक) के हृदय को हरण करने वाली, आनन्द के समुद्र से परिपूर्ण काव्यलता के समान रमणी सुन्दर गुण वाले व्यक्ति के द्वारा सेवन की जाती है । भाव यह है:— जैसे अनेक भावभरिता सरल, सहृदय हृदय–हारिणी, शृङ्गारादि अथवा काव्यानन्दरूपी रस से परिपूर्ण कविता को गुणज्ञ और रसज्ञ ही समझ सकता है उसी प्रकार उक्त गुणों

वाली रमणी को भी सहृदय ही समझ सकता है ॥४८॥

अनया ताडितपुरुषाः
घ्नन्त्यात्मानं विषादिना बहवः ।
वाचां साधुप्रयोक्त्री-
मबलां कथयानि किं भुक्त्वा ?॥४९॥

नारी के वचनों द्वारा तिरस्कृत बहुत से पुरुष विष खाकर आत्म-हत्या करते देखे गये हैं। वाणी का उचित प्रयोग करने वाली विदग्ध नारी को क्या खाकर मैं अबला कह सकता हूँ ?॥४९॥

कुलकूलद्वयसेतुं
प्रतिकलमप्यूर्ध्वमेव जड्भावात् ।
जगतो भारं वोढुं
शक्तं नारीवपुर्नमत ॥५०॥

नारी अपने पिता और श्वसुर के कुलरूपी किनारों को जोड़ने वाली है। जड़भावना से प्रतिक्षण यह ऊपर रहती है। संसार के आवागमन (जन्म) के भार को वहन करती है। ऐसे समर्थ सेतुरूप स्त्री के शरीर को नमस्कार है। सेतु (पुल) भी तटों को मिलाने का काम करता है, (नदी के) जल से सदा ऊपर उठा रहता है, और आने जाने वाले लोगों के भार को सहन करता है। यहाँ नारी के शरीर और सेतु का श्लिष्ट वर्णन किया गया है ॥५०॥

कुटिलभ्रूलतमस्या
रोषाविष्टं मुखं मनाग् दृष्ट्वा ।

धैर्यधना नो कति वा
कम्पेनालिङ्गिता दृष्टाः ?।५१।।

मान अथवा क्रोध की दशा में इसकी कुटिल भृकुटियों वाले मुख को जरा देखते ही कितने धैर्यधन कम्पित नहीं हो जाते ? यदि यह अबला होती तो क्या कोई इसके डर से इस प्रकार काँपता?।५१।।

तन्वी सरला दिव्या
ह्युपकर्त्री दृश्यते सदा नारी ।
रश्मी रवेरिवेयं
पुरुषस्य दशासु सकलासु ।।५२।।

तन्वी, भोली और दिव्यगुणों से सम्पन्न यह स्त्री पुरुष की सम्पूर्ण दशाओं में सूर्यरश्मि के समान ही उपकार करती देखी जाती है। जैसे सूर्य की सीधी, और स्वर्ग से आने वाली किरणें पुरुषों को प्रकाश, स्वास्थ्य जीवन आदि देती हैं, उसी प्रकार स्त्री भी सदा पुरुष का हित ही करती है ।।५२।।

आर्या ललना नष्टे-
✓ स्वामिनि धैर्यात् कुकालमपि सहते ।
रामाराधननिपुणो
विधुरो रामायते कोऽपि ।।५३।।

श्रेष्ठ वंश की ललना अपने स्वामी के नष्ट हो जाने पर धैर्यपूर्वक बुरे वक्त (वैधव्य) को भी सहन कर लेती है । किन्तु नित्य ही रामाओं (स्त्रियों) के आराधन में निपुण कोई (लाखों में एक) विधुर राम के समान आचरण करता है ।।५३।।

मदिरेयं मदिराक्षी
नरवृक्षस्यामृता लता नारी ।
रागारुण नेत्राणां
रसाञ्जनं नायिकारूपम् ॥५४॥

मदिर नयनों वाली यह नायिका ही वास्तव में मदिरा है । (इसके रहते हुए भी शराब पीने वाले पति महाशय अपना विनाश कर रहे हैं) पुरुष रूपी वृक्ष के साथ यह अमृता लता के समान है । और राग (प्रेम अथवा क्रोध) से लाल आँखों के लिए नायिका का सुन्दर रूप ही रसाञ्जन के समान माना जाता है ॥५४॥

स्वीया वा सामान्या
आकर्षन्ति चेतांसि मनुजानाम् ।
धनहृन्मानहरीयं
परकीया संस्तुता लोके ॥५५॥

(नायिकाओं के सैंकड़ों भेद स्वीकार किये गये हैं । किन्तु प्रारम्भ में स्वकीया, परकीया और सामान्या तीन भेद हैं । इनमें) स्वीया अथवा सामान्या नायिका पुरुषों के मन को ही आकृष्ट करती हैं । किन्तु परकीया धन, हृदय और सम्मान का हरण करने वाली मानी जाती है । भाव यह है कि इसका परभाव भी अत्यन्त प्रबल और आकर्षक है । संसार की शत्रुओं (पर) अथवा दूसरों की वस्तुओं से द्वेष हो सकता है, परन्तु परकीया से द्वेष नहीं हो पाता ॥५५॥

पुरुमपि वश्यं पुत्रं
ययातिरेवानुयाचते जरठः ।

यौवनमहो ! विलासी
नतु जननी क्वापि संसारे ॥५६॥

वृद्ध और विलासी ययाति ही अपने आज्ञाकारी पुत्र पुरु से यौवन (उधार) माँगता है। आश्चर्य ! किन्तु कहीं भी संसार में जन्मदात्री ने अपनी सन्तान से यौवन माँगकर भोगविलास नहीं किये ॥५६॥

जनमानसैक हंसी
गुरुकर्णामृत रसप्रदा वंशी ।
भावप्रकाशरूपा
मातृसुभाषा न पितृभाषा ॥५७॥

मनुष्यों के मानस (मन) रूपी मानसरोवर में हंसी के समान विहार वाली गुरुकर्णों में अमृत और रस प्रदान करने वाली वंशी के समान मधुर, हृदय के भावों को प्रकाश में लाने वाली मातृ-भाषा ही प्रसिद्ध है, पितृभाषा नहीं। (इस दृष्टि से भी माता का ही महत्त्व अधिक है) ॥५७॥

गरीयसीं स्वर्गादपि
सुखदाँ वरदां सदैव रसरूपाम् ।
मातृमेदिनीं जननीं
वन्द्यां पितरो धियैवाहुः ॥५८॥

स्वर्ग से भी अधिक महान्, सुखदा और वरदा सदा ही रसरूप मातृभूमि और माता को पूर्वजों ने बुद्धिपूर्वक सदा वन्दनीय ही कहा है। कहीं भी पितृभूमि मातृभूमि की तुलना में श्रेष्ठ नहीं मानी गयी है ॥५८॥

नयनहरी निशि सुखदा
दर्शित-बहुरूप माधुरी रम्या ।
नव संयोगवतीयं
सेव्या निद्रा सदा रामा ॥५६॥

अपने उत्कृष्ट सौन्दर्य के कारण नयनों का हरण करने वाली रात्रि में सहवासजन्य सुख देने वाली, अनेक प्रकार से रूपमाधुरी दिखाने वाली, रम्य एवं नवसंयोग सहित इस निद्रा-रामा का सेवन करना चाहिये ॥५६॥

भवरोगहरी सुभगा
मनसा सेव्या नरस्य हितकर्त्री ।
नारायणी तनू वा
कन्नानन्दयति रमणीयम् ॥६०॥

सांसारिक चिन्ता आदि रोगों को शान्त करने वाली, सुभगा, सदैव मनके द्वारा सेवनीय, पुरुष का हित करने वाली यह रमणी नारायण के शरीर के समान किसको आनन्दित नहीं करती ? भगवान् विष्णु की रूपकान्ति भी सांसारिक दैहिक, दैविक एव भौतिक ताप-रोगों का हरण करती है, अत्यन्त सुभग (सुन्दर) है, नर (अर्जुन) का सर्वतोभावेन हित करने वाली है। (यहाँ रमणी और नारायणीतनु का साम्य है) ॥६०॥

उद्वाहान्मरणान्तं
रक्षति विषमेऽपि वल्लभं समये ।
पुरुषस्य कवचरूपा
विधिकर-रचितेव तरुणीयम् ॥६१॥

विवाह से लेकर (अपनी) मृत्युपर्यन्त, विषम परिस्थितियों में भी अपने प्राणवल्लभ की रक्षा करती हुई यह तरुणी मानों विधाता के हाथों के द्वारा पुरुष के लिए कवच के रूप में निर्मित की गयी है ॥६१॥

शय्यां रुग्णा गृहिणी
गृह्णाति यदा कदापि ननु दैवात् ।
अस्तव्यस्तं सकलं
भवति गृहं भूभुजां युगपत् ॥६२॥

यदि कभी दुर्भाग्य से गृहिणी रुग्ण होकर खाट पकड़ ले तो बड़े-२ राजाओं (के समान धन्ना सेठों) का घर अस्तव्यस्त हो जाता है ॥६२॥

विगतबले सुरलोके
लोकहिताय प्रवृद्धखररोषा ।
शुम्भनिशुम्भध्वंसे
कृतकार्या चण्डिका दृष्टा ॥६३॥

देवताओं की शक्ति क्षीण होती चली गयी । शुम्भ और निशुम्भ नामक दैत्यों के लिए ध्वंस के लिए प्रचण्ड क्रोध वाली चण्डिका ही लोकोपकार करके कृतकार्य हुई । (उस समय परमपुरुषार्थी देवलोक किंकर्तव्यविमूढ़ होकर बैठ गया था) ॥६३॥

अचला धरति धरित्री
किं किं स्वाङ्के न कोऽपि जानीते ।
मानसमपि महिलाया
मातुं शक्तः पुमान्नैव ॥६४॥

अचला धरती अपने अङ्क में क्या-क्या रखे हुए है, इसे कोई भी पूर्णतः नहीं जान सका। इसी प्रकार अत्यन्त रहस्यों से पूर्ण महिला के हृदय की बातों को पुरुष नहीं जान सकता ॥६४॥

शनि राहु केतु सहिताः
दिवसाः सप्तैव केवलं गणिताः ।
चन्द्राभरणास्तिथयो
नवषट् संख्यासु राजन्ते ॥६५॥

शनि राहु, केतु आदि के सहित दिवस केवल सात ही गिने जाते हैं। किन्तु चन्द्रमारूपी आभरण वाली तिथियाँ पन्द्रह सुशोभित रहती हैं। (दिवस पुल्लिङ्ग है और तिथि स्त्रीलिङ्ग अर्थात् दिवसों की अपेक्षा तिथियाँ कहीं अधिक हैं) ॥६५॥

षट्त्रिंशद् रागिन्यः
सचेतसां रञ्जयन्ति हृदयानि ।
मानस-संमोहकराः
षड्रागाः केवलं गीताः ॥६६॥

सहृदयों के हृदय को रञ्जित करने वाली मुख्य रागिनियाँ छत्तीस हैं, जबकि मन को मुग्ध करने वाले राग केवल छः ही माने गये हैं। भाव यह है कि मुख्य राग छः हैं किन्तु प्रत्येक राग की रागिनियाँ छः छः हैं। यहाँ भी रागिनियों की ही संख्या प्रबल है ॥६६॥

पुरुषैः सेव्या रमणी
सर्वावस्थासु यत्नतो रक्ष्या ।
जाते ग्रीवोच्छेदे
जीवनमस्ति क्व जीवानाम् ?॥६७॥

पुरुषों का कर्त्तव्य है रमणी का सेवन। इतना ही नहीं सभी अवस्थाओं में उसकी रक्षा करना भी पुरुष का परम कर्त्तव्य है। जिस प्रकार गर्दन कट जाने पर प्राणियों का जीवन असम्भव है, उसी प्रकार स्त्रियों के अभाव में पुरुषों का जीवन भी असम्भव है ।।६७।।

हरति मनांसि बहूनां
नयनानि गतागतानि नवयूनाम् ।
मूढान् करोति विज्ञान्
नितम्बिनीनामियं शक्तिः ।।६८।।

नितम्बिनी नायिकाओं की शक्ति देखिये— अनेकों का मन हर लेती हैं, इनकी गति नौजवानों की आँखे चुरा लेती है, ये अपनी शक्ति से विद्वानों को मूर्ख बना सकती हैं। (इन्हें अबला मानना कैसे उचित हो सकता है ?) ।।६८।।

पुरुषं रक्षति यत्नात्
मन्त्रार्थमिव प्रबोधसहितेयम् ।
संकटसमये तस्मै
जीवनमपि दीयते ह्यनया ।।६९।।

जिस प्रकार साधक मन्त्र के अर्थ की बुद्धिपूर्वक रक्षा करता है उसी प्रकार यह स्त्री प्रबोध सहित, यत्नपूर्वक पुरुष की रक्षा करती है। पुरुष के संकट की दशा में यह अपने जीवन का भी मोह नहीं करती । उसकी रक्षा के लिए अपने प्राणों को भी निछावर कर देती है ।।६९।।

इयमेव धृतिर्ममता
करुणा श्रद्धा कला कृपा लज्जा ।

सद्गुणगणजननीयं
विशेषतो भारते वर्षे ॥७०॥

यही धृति स्वरूपा है। ममता, करुणा, श्रद्धा, कला, कृपा एवं लज्जा भी यही है। विशेषकर भारतवर्ष में तो सद्गुणगण की यही जननी है ॥७०॥

इयमेवाद्या शक्ति
र्गुणगौरवगुम्फिता नवा माला
आकर्षति कं कस्मिन्
काले नहि कोऽपि जानीते ॥७१॥

आदिशक्ति यही है। (दया दाक्षिण्यादि) गुणों के गौरव से गुँथी हुई यह अभिनव माला के समान है। यह कब किसे आकृष्ट करले इस बात को विधाता भी नहीं जान सकता ॥७१॥

कुटिलालकाऽपि सरला
गजहंसगतिश्च राजभिर्गम्या ।
वामाऽपीयं रमणी
कमनीया कथ्यते कविभिः ॥७२॥

कुटिल अलकों से युक्त होती हुई भी यह सरल है, गज और हंस-गति होती हुई भी यह राजाओं के द्वारा गम्य (गमनयोग्य) है। वामा (वाम एवं सुन्दरी) होने पर भी यह रमणी कवियों के द्वारा कमनीय ही कही जाती है ॥७२॥

यत्रानादर आसां
गच्छति लक्ष्मीर्गृहस्य तस्यापि ।

नासानाशे शोभा
मुखचन्द्रस्य क्व वा दृष्टा ?।७३।।

जिस घर में स्त्रियों का अनादर होता है उस घर की शोभा और लक्ष्मी भी चली जाती है। नाक कट जाने पर मुख-चन्द्र की क्या कहीं शोभा देखी जा सकती है ?।७३।।

ब्रह्माण्डार्धादंशा-
ज्जाता पत्नी प्रसिद्धमाम्नाये ।
तुल्या नरेण नारी
कथमबलेत्युच्यते मुग्धैः ?।७४।।

सृष्टि के आरम्भ में हिरण्मय–अण्ड ब्रह्माण्ड के आधे अंश से पत्नी उत्पन्न हुई और आधे अंश से पति बना, यह बात शास्त्रों में प्रसिद्ध है। जब नारी नर के बिल्कुल बराबर है तब मुग्ध इसे अबला क्यों कहते हैं ?।७४।।

वार्द्धक्यकरी नृणां
रतिरित्युक्तं महाबुधैः शास्त्रे ।
यौवनवनपतितानां
वामानां रसायनं सैव ।।७५।।

'सम्भोग पुरुषों के लिए वृद्धावस्था का कारण है' – यह बात चाणक्य आदि विद्वानों ने शास्त्रों में बतायी है। किन्तु यही रति यौवन रूपी वन (जंगल एवं पानी) में पड़ी हुई वामाओं के लिए परम रसायन है ।।७५।।

विष्णोर्माया नारी
मोहितमनयाऽखिलं जगत् शक्त्या ।

अस्या दिव्यप्रभावा-
दस्पृष्टः कोऽपि नो दृष्टः ॥७६॥

नारी विष्णुभगवान् की माया है । इसने सम्पूर्ण जगत् को अपनी शक्ति से मोहित किया हुआ है । इसके दिव्य प्रभाव से अछूता कोई भी तो नहीं दिखाई पड़ा । (अथवा ब्रह्मा भी इसके प्रभाव से अछूता नहीं है) ॥७६॥

नयनाभ्यां मीनवती
गमने वामा तथैव मुखकमला ।
वंश-हिमाद्रित्यागाद्
गङ्गेवेयं मता वनिता ॥७७॥

यह वनिता वास्तव में गङ्गा है । क्योंकि इसके नेत्र ही मीन हैं । इसकी वामा गति है । मुख इसका कमल है । वंशरूपी हिमालय को छोड़कर यह (अपने श्वसुरालय रूपी सागर में) पहुँचती है ॥७७॥

सञ्जीवनीमहौषधि-
रियमखिलानामशक्त जीवानाम् ।
विधिना विहिता नारी
पुरुषाङ्गणमध्यगा ज्योत्स्ना ॥७८॥

सम्पूर्ण अशक्त जीवों के लिए यही संजीवनी महौषधि है । विधाता ने पुरुष के आंगन में ज्योत्स्ना के समान इस नारी को बनाया है ॥७८॥

कथितो विष्णुरकारो
माया बलमस्ति तत्त्वतस्तस्य ॥

सा चेयमेव नारी
सिद्ध्यत्यबलात्वमप्यस्याः ॥७६॥

शास्त्रों में 'अकारो वासुदेवः स्यात्' के द्वारा 'अकार' भगवान् विष्णु का नाम है। माया ही तत्वतः उनका वल है। और यह नारी ही माया है। इसलिए तो इसका 'अबलात्व' माना जा सकता है, किसी अन्य रूप में इसे अबला (निर्बल)नहीं कहा जा सकता ॥७६॥

श्रुति सुखदाऽमृतवाग्भि-
र्लब्धाभिनन्दनाऽपि सहस्राक्षैः।
'नरकद्वारं नारी-
त्युक्तं कैश्चिन्मनो मोहात् ॥८०॥

अपनी अमृततुल्य वाणी से श्रुति (श्रुति=कान एवं वेद) सुख देने वाली और सहस्राक्ष (हजारों नेत्रों एवं इन्द्र) के द्वारा अभिनन्दित नारी को 'नरक का द्वार' किन्हीं (जिनका नाम भी लेना ठीक नहीं है) ने मन के मोह के कारण ही कह दिया है ॥८०॥

भवदवपुरुषस्थाणू
रमणी वल्लीविलीनसर्वाङ्गः।
सरसं जीवति चिन्ता-
झञ्झावातै र्न च स्पृष्टः ॥८१॥

संसार रूपी जंगल में पुरुष रूपी ठूँठ (सूखा हुआ नीरस वृक्ष) रमणी रूपी वल्ली में अपने सर्वाङ्ग से विलीन होकर आनन्दित (सरस) होकर जीवित (हरा-भरा) रहता है और चिन्तारूपी झञ्झावातों से प्रभावित भी नहीं होता। विशेषता यह है कि लोक में लता वृक्ष का सहारा लेती है, पर नारीरूपी लता का सहारा पुरुष-

वृक्ष ही लेता है ॥८१॥

योगेनामृतफलदा
मोहाद्विषरूपिणी मता वनिता ।
अधरीकृत पीयूषा
सुधाधरा चन्द्रवदनेयम् ॥८२॥

योग (संयोग एवं चित्त-वृत्ति निरोध) के द्वारा यही वनिता अमृत तुल्य फल देने वाली है । मोह से सेवन करने पर यही विषरूपिणी हो जाती है । यह चन्द्रवदनी और सुधामय अधरों वाली रमणी (स्वर्ग के तथाकथित) अमृत को नीचा दिखा देती है ॥८२॥

नरबलकलधौतस्य
निकषोपलतां गतेयमबला वै ।
तत्सङ्गवशादस्मिन् ।
सौन्दर्यमपूर्वमायातम् ॥८३॥

पुरुष की शक्ति रूपी सुवर्ण के लिए यही अबला निकषोपल (कसौटी) है । इसी के सत्संग के कारण (पुरुष में) एक अपूर्व सौन्दर्य आया है ॥८३॥

योगेषु सदा सुखदा
मृदिता सर्वाङ्गपोषणे शक्ता ।
कामरुजामि.:मेका
महौषधी रसवती वनिता ॥८४॥

संयोग की दशा में यह सदा सुख देने वाली है । आलिङ्गन अथवा सुरतकाल में मृदित होने पर पुरुष के सर्वाङ्ग पोषण में समर्थ है । निश्चय ही कामरोगों के लिए यह वनिता रसवती महौषधि के

समान है । रस औषधि भी योग (नुस्खों) के कारण सदा सुख देती है, अच्छी तरह घुट-पिसने के बाद सभी अङ्गों को स्वस्थ करती है ।।८४।।



निजनयनाग्रे दृष्ट्वा
स्वसुतस्य वधन्तु राज्य रक्षायै ।
विरुराव न सा पन्ना
राजस्थानस्थिता देवी ।।८५।।

राजस्थान में (अपने यशः शरीर से) स्थित दिव्य गुणों वाली पन्ना-धाय धन्य है, जिसने अपने नयनों के आगे ही राज्य और युवराज की की रक्षा के लिए अपने बेटे का वध देखकर भी कोई रोना-पीटना नहीं किया ।।८५।।

जाते विदेश-राज्ये
झाँसी राज्यस्य राजजननीयम् ।
दुर्गेवासील्लक्ष्मी
यन्नाम्ना कम्पिता आँग्लाः ।।८६।।

विदेशियों (अंग्रेजों) के राज्य होने पर भी झाँसी राज्य की राज-माता लक्ष्मीबाई दुर्गा के समान शत्रुमर्दिनी बन गयी थी । इसके नाम से भी अंग्रेज काँपने लगते थे । (क्या अबला के नाम से कोई काँपता है ?) ।।८६।।

कैकयनन्दिनि ! धन्या,
त्वं यामवलोक्य दशरथो राजा ।
मोहव्याघ्राघ्रातो
नाग इवावनि-तले पतितः ।।८७।।

कैकयनन्दिनि ! तू धन्य है। तुझे देखकर राजा दशरथ मोह से धरती पर इस तरह गिर पड़ा जैसे व्याघ्र (सिंह आदि) की गन्ध पाकर हाथी जमीन पर गिर जाये ॥८७॥

कुलकुशलकरीं साध्वीं
सावित्रीं पतिपरायणामेकाम् ।
वाग्वीरां यमजयिनीं
के नहि जानन्ति विद्वान्सः ?॥८८॥

दोनों कुलों का कुशल करने वाली साध्वी, पतिपरायणा, अद्वितीय सती, वाग्वीर और यमराज को भी जीतने वाली सावित्री को कौन विद्वान् नहीं जानता ?॥८८॥

गोल्डामायरविक्टो-
रियैलिजाबेथ गान्धिमनुबाई ।
सिरिमाओ बण्डार-
प्रभृतीनां महन्महत्त्वं हि ॥८९॥

गोल्डामायर, विक्टोरिया, एलिजावेथ, इन्दिरा गान्धी, मनुबाई (लक्ष्मीबाई) सिरिमाओ बंडारनायके आदि महिलाओं का महत्त्व किससे अविदित है ?॥८९॥

दुर्गाऽहल्याजोधा-
बाई रजियासु दीयतां दृष्टिः ।
गायत्री विजया च
स्त्रीरत्नानां महारत्नम् ॥९०॥

दुर्गावती, अहल्याबाई, जोधाबाई, रजियाबेगम को देखिये।

इनके अतिरिक्त महारानी गायत्री देवी (जयपुर की राजमाता) और महारानी विजया राजे सिन्धिया (ग्वालियर की राजमाता) तो स्त्री रत्नों में भी महारत्न हैं ॥६०॥

धवमन्धं धृतराष्ट्रं
धैर्यैकधना विलोक्य गान्धारी ।
पटपट्टिकया नयने
बबन्ध पतिधर्मसंलग्ना ॥६१॥

अपने पति धृतराष्ट्र को अन्धा देखकर धैर्यधनगान्धारी ने पतिधर्म का पालन करते हुए अपने (स्वस्थ) नेत्र बाँध लिये। क्या कोई पुरुष ऐसा त्याग कर सकता है?।६१॥

सौमित्री रघुपतिना
सह गहनं गतो लोकवषभ्यः ।
उवासोर्मिला साध्वी
साकेते योगिनी धीरा ॥६२॥

सुमित्रानन्दन लक्ष्मण श्रीराम के साथ चौदह वर्षों के लिए वन में गये। इधर साकेत (अयोध्या) में साध्वी योगिनी उर्मिला (लक्ष्मणपत्नी) धैर्यपूर्वक रही। (क्या अबला में यह धैर्य हो सकता है?) ॥६२॥

द्रुपदात्मजया युद्धं
कारितमतिभीषणं कुरुक्षेत्रे ।
यत्क्रोधाग्नौ दग्धाः
शलभा इव धार्तराष्ट्रास्ते ॥६३॥

द्रौपदी ने अपनी प्रेरणा देकर अत्यन्त भीषण कुरुक्षेत्र का

युद्ध करा दिया। इसी द्रौपदी के क्रोध की अग्नि (रूपी युद्ध) में धृतराष्ट्र के पुत्र कीट-पतंगों के समान जल कर मर गये ॥९३॥

रमणीपंक्तिषु कुलटा-
नामानि यदि स्मरन्ति विद्वान्सः ।
तेषामपि वैदुष्ये
बुधाः करिष्यन्ति ह्याश्चर्यम् ॥९४॥

(कोई यदि कहे कि मन्थरा, शूर्पनखा आदि भी तो स्त्रियाँ हैं, इनका नाम कौन आदर से लेता है? उसके समाधान के लिए कहते हैं-) यदि रमणियों की श्रेणी में कुलटाओं के नामों का स्मरण कुछ विद्वान् करना चाहें, तो उनकी विद्वत्ता के ऊपर ज्ञानी लोग आश्चर्य करेंगे, खेद ही करेंगे ॥९४॥

विष्णुश्चलया मेघः
सौदामिन्या च मायया ब्रह्म ।
शिवया शिवो वशिष्ठोऽ
रुन्धत्यैवास्ति पूजार्हः ॥९५॥

भगवान् विष्णु लक्ष्मी के कारण पूज्य हैं, बादल बिजली के कारण स्तुत्य है, ब्रह्म माया के साथ, भगवान् शिव पार्वती के साथ और महर्षि वशिष्ठ अरुन्धती के साथ ही पूज्य हैं ॥९५॥

सिन्धुर्नदीभिरेवं
रविरपि छायाश्रितः सदा वन्द्यः ।
निशया शशी कलाभि-
र्नार्या साकं नरः स्तुत्यः ॥९६॥

समुद्र नदियों के कारण और सूर्य भी छाया के द्वारा आश्रित रहता हुआ ही सदा वन्द्य है। चन्द्रमा रात्रि एवं अपनी (अमृता, मानदा आदि) सोलह कलाओं के कारण पूज्य है। इसी प्रकार नर की भी शोभा नारी के ही साथ है ।।९६।।

पुरुषे यदि पुरुषार्थः
स तु तस्य गुणः स्वभावतः सिद्धः ।
किन्त्वङ्गना शरीरे
कोऽपि विशिष्टो गुणः कथितः ।।९७।।

पुरुष में यदि पुरुषार्थ है, तो वह कोई आश्चर्य का कारण नहीं है। वह तो उसका स्वभावसिद्ध गुण है। किन्तु अङ्गना के शरीर में पुरुषार्थ (शक्ति) एक विशेष गुण माना जाता है ।।९७।

पुरुषासनमध्यास्ते
यदि महिला नास्ति चित्रमपि किञ्चित् ।
महिलासनस्थितानां
पुरुषाणां निन्दिता कीर्तिः ।।९८।।

लोक में देखा जाता है, यदि महिला पुरुष के आसन (रेल, बस आदि की सीट) पर बैठ जाती है, तो कुछ भी आश्चर्य नहीं होता। पर महिलाओं के आसन (सीट, कम्पार्टमेण्ट आदि) पर बैठने वाले पुरुषों की निन्दा ही होती है ।।९८।।

अकरोद् ज्ञानवतीयं
✓ **मूढं व्यवहार-शून्यमपि नाथम् ।**
विद्योत्तमा कवीन्द्रं
रघुकारं कालिदासाख्यम् ।।९९।।

रघुवंश महाकाव्यादि के प्रणेता कालिदास नाम के महाकवि को उनकी पत्नी विद्योत्तमा ने ज्ञानवान् बनाया। अन्यथा तो कालिदास पहले महामूढ़ और व्यवहार शून्य ही था। (जिस शाखा पर बैठा हुआ था उसे ही काट रहा था — ऐसी प्रसिद्धि है) ॥९९॥

अखिलं जगद्व्यलोकि
श्रीराममयं बुधेन येनासौ।
तुलसी रत्नावलितः
शुशुभे क इदन्न जानाति ?॥१००॥

जिसने 'सिया राममय सब जगजानी' कह कर सम्पूर्ण विश्व को सीताराममय देखा वह महाकवि तुलसीदास अपनी पत्नी रत्नावली के कारण ही प्रतिष्ठित हुआ, इस बात को कौन नहीं जानता ? ।१००॥

श्यामस्तमालरूपः
कंसारिः सेव्यते क्व वैकाकी ?
राधाराधितरूपो
माधव आह्लाददो दृष्टः ॥१०१॥

तमाल के समान श्यामल, कंस-शत्रु कृष्ण को एकाकी रूप में कौन पूजता है ? राधा के द्वारा आराधित रूप वाले माधव ही आनन्ददायक रूप में देखे गये हैं ॥१०१॥

भट्टारिकां शिलाख्यां
सूरीकां विज्जिकां क्षमां विज्ञाम्।
गौरीं विकटनितम्बां
कविकर्मणि के न जानन्ति ?॥१०२॥

शिलाभट्टारिका, सूरीका, त्रिज्जिका, क्षमा, गौरी, विकटनितम्बा आदि संस्कृत कवयित्रियों को कौन नहीं जानता ? (इसी प्रकार हिन्दी, अंग्रेजी, उर्दू आदि अनेक भाषा-साहित्यों में स्त्रियों का अपना विशेष स्थान है । उसको पूर्णतः लिख पाना तो असम्भव ही है ।) ॥१०२॥

उल्लंघ्य वचो बाली
ताराया अवाप वै निधनम् ।
मन्दोदरीमुपेक्ष्य
क्षमामप्यलुठद्दशग्रीवः ॥१०३॥

अपनी पत्नी तारा के वचन का उल्लंघन करके बाली (श्रीराम के हाथों) मृत्यु को प्राप्त हुआ । मन्दोदरी (के वचनों) की उपेक्षा करके दशग्रीव रावण धराशायी हो गया ॥१०३॥

अन्धो भवति भुजङ्गोऽ
न्तर्वत्नीभिर्विलोकितः क्रूरः ।
पुत्रोत्संगवतीभि-
र्दूरीक्रियतेऽन्धता तस्य ॥१०४॥

क्रूर भुजङ्ग (धूर्त, नालायक पति और सर्प) गर्भवती स्त्रियों के द्वारा देखा जाने पर अन्धा (सहवास के अभाव में किंकर्त्तव्यविमूढ़ और आँखों से अन्धा) हो जाता है । किन्तु पुत्र से भरी हुई गोदवाली उन्हीं स्त्रियों के द्वारा उसकी अन्धता दूर की जाती है ॥१०४।

शिवरोषानल दग्धोऽ
द्यापि विजयते ह्यनङ्गरूपेण ।

रतिकृपया कन्दर्पो
भस्माङ्गः खर्वगर्वतनुः ॥१०५॥

आज भी शिव की क्रोधाग्नि में भस्मीभूत, अहंकारहीन कामदेव अनङ्ग रूप में रति (पत्नी) की कृपा से ही विजयी है। (यह कथा पुराण और लोक कथाओं में अत्यन्त प्रसिद्ध है) ॥१०५॥

धरणीं त्यागपरामिह
विलोक्य वसते निराकुलो नाकः।
दिवसे मोद-प्रकाशो
निशि तारा रोमहर्षोऽस्य ॥१०६॥

धरती को (वरावर अन्नादि देते रहने से) त्याग-सहित देखकर आकाश ऊपर निराकुल रहता है। दिन में प्रकाश आकाश का मोद है और रात में तारे उसका रोमाञ्च हैं ॥१०६॥

कार्यालयेषु सेना-
स्वाकाशगिरासु राजपीठेषु।
क्रीडाकलासु चासां
पदमत्युच्चैस्तरां भाति ॥१०७॥

सभी ऑफिसों, सेना, आकाशवाणी, सरकारी पद एवं खेलकूद तथा अन्य ललित कलाओं तथा उपयोगी कलाओं में इन महिलाओं का पद अब बहुत उच्च है ॥१०७॥

मृगतृष्णेयं रमणी
पुरुषमृगाणां तु कामहर्त्रीयम्।
सत्पथपथिकानान्तु
स्वर्गङ्गेयं सदा शुभदा ॥१०८॥

मृग के समान चञ्चल पुरुषों के लिए, काम (इच्छा एवं काम) का हरण करने वाली यह रमणी मृगतृष्णा के समान ही दूर-दूर तर रहती है। हाँ, सत्पथ के पथिकों के लिए यही सदा कल्याणकारिणी स्वर्गगङ्गा के समान है ॥१०८॥

किं बहुना शुभगमना
सहमाना तर्जनीकृतां भीतिम् ।
स्फाटिकमाला नारी
पुरुषविमोक्षेऽद्भुतं हेतुः ॥१०९॥

अधिक क्या कहें, यह शुभगभना (शुभगति और सुन्दर सुरत वाली) पति की तर्जनी (अंगूठे के पास वाली अंगुली) के द्वारा भी (शील के कारण) भयभीत हो जाने वाली स्फटिकमणि की माला के समान यह नारी पुरुष के मोक्ष का अद्भुत हेतु है। स्फटिकमणि की माला की गति (जपकाल में) शुभ होती है, तर्जनी की भीति को भी वह सहन नहीं करती, "स्फटिको मोक्षदः' के अनुसार जपकर्त्ता के मोक्ष (जन्म-मृत्यु से छुटकारा) की वह अद्भुत हेतु है ।
(सांख्य दर्शन के अनुसार भी प्रकृति पुरुष के मोक्ष का कारण है) ॥१०९॥



पण्डित विष्णुकान्त शुक्ल

जन्म : २६/१०/४२

शिक्षा : एम. ए. (हिन्दी, संस्कृत) सहित्याचार्य, साहित्यरत्न

अध्यापन : जे. वी. जैन कालेज, सहारनपुर

लेखन : मकरन्द (दिल्ली), विज्ञान ज्योति (खुरजा) कादम्बिनी, मुक्ता, सर्वहिताय, साप्ताहिक हिन्दुस्तान (दिल्ली), मनोरमा (इलाहावाद) सूत्रकार (कलकत्ता) विश्व संस्कृतम् (पंजाव) संवित् (बम्बई) दिव्यज्योतिः (शिमला) संस्कृत प्रचारकम्, संस्कृत रत्नाकर, अर्वाचीन संस्कृतम् (दिल्ली), उत्कलोदयः (उड़ीसा), सर्वगन्धा (लखनऊ), स्वरमंगला (राजस्थान), गैर्वाणी (चित्तूर), गाण्डीवम् (वाराणसी) आदि में पिछले २५ वर्षों से लेखन ।

सम्पादन एवं व्याख्या : कवितावली, पदमावत, पद्मावतीसमय, कादम्बरी कथामुखम्, नीतिशतकम्, श्रीमद्भगवद्गीता,

मौलिक : संस्कृत शिक्षा

आवास : विभावना प्रद्युम्ननगर, सहारनपुर

मुखपृष्ठ सज्जा : गीता शर्मा